THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 348.

याज्ञवल्क्यस्मृतिः।

श्रीमित्रमिश्रकृत'वीरमित्रोदय'टीकया श्रीविज्ञानेश्वरकृत-'मिताक्षरा'टीकया च सहिता।

साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च
संशोधिता।

YĀJÑAVALKYA SMṚTI

With the Commentary of Mitra Mis'ra's
Vīramitrodaya and Vijnānes'vara's Mitākṣarā.

EDITED BY

Pt. Nārāyaṇa S'āstrī khiste Sāhityāchārya Assistant Librarian and
Pt. Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya Sādholāl Scholar
Sarasvatībhavana Benares.

FASCICULUS IV–४

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1926.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

धानाद्दक्षिणाग्नौ होमः 'कर्म स्मार्तं विवाहाग्नौ' इत्यस्यापवाददर्शनात् । यथाह मार्कण्डेयः-'आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः । अनाहिताग्नि(१)स्त्वौपसथेऽग्न्यभावे द्विजेऽप्सु वा' ॥ इति । अर्धाधानपक्षे त्वौपासनाग्निसद्भावादाहिताग्नेरनाहिता(२)ग्नेरिवोपासनाग्नावेवाग्नौकरणहोमः । एवमन्वष्टकादिषु त्रिष्वपि पिण्डपितृयज्ञ(३)कल्पातिदेशात् । काम्यादिषु चतुर्षु ब्राह्मणपाणावेव होमः । यथाहुर्गृह्यकाराः-'आन्वष्टक्यं च पूर्वेद्युर्मासिमास्यथ पार्वणम् । काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् ॥ चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते । पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि' ॥ अस्यार्थः-'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः' इत्यष्टका विहिताः । तत्र नवम्यां यत्क्रियते तदन्वष्टक्यम् । सप्तम्यां क्रियमाणं पूर्वेद्युः । मासिमासि कृष्णपक्षे पञ्चमीप्रभृतिषु यस्यां कस्यांचित्तिथावन्वष्टक्यातिदेशेन यद्विहितम् । अमावास्यायां पिण्डपितृयज्ञानन्तरं यद्विहितं तत्पार्वणम् । स्वर्गादिकामनायां कृत्तिकादिनक्षत्रेषु यद्विहितं तत्काम्यम् । अभ्युदये पुत्रोत्पत्त्यादिषु तडागारामदेवताप्रतिष्ठादिषु च यद्विहितं तदाभ्युदयम् । अष्टम्यां अष्टका विहिताः । एकोद्दिष्टम् । अत्रैकोद्दिष्टशब्देन सपिण्डीकरणं ल(४)क्षयति, तत्रैकोद्दिष्टस्यापि सद्भावात्, साक्षादेकोद्दिष्टे तदभावात् । अथवा गृह्यभाष्यकारमते साक्षादेकोद्दिष्टेऽपि पाणिहोमस्य सद्भावा(५)त्साक्षादेकोद्दिष्टमेव । एतेषामष्टानामाद्येषु चतुर्षु साग्निकस्याग्नौ होमः । उत्तरेषु चतुर्षु पित्र्यब्राह्मणहस्ते । निरग्निकस्यापि प्रमीतपितृकस्य द्विजस्य पार्वणं नित्यमिति तस्यापि पाणावेव होमः । 'न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः । इन्दुक्षये मासि मासि प्रायश्चित्तीयते तु सः' ॥ इति वचनात् । एवं काम्याभ्युदयिकाष्टकैकोद्दिष्टेषु पाणावेव होमः । 'अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्' इति मनुस्मरणात् । पाणिदत्तस्य पृथग्ग्रास(६)प्रतिषेध उच्यते । यथाहुर्गृह्यकाराः-'अन्नं पाणितले दत्तं पृ(७)थगश्नन्त्यबुद्धयः । पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते ॥ यच्च पाणितले दत्तं यच्चान्यदु-

(१) स्त्वौपासनेऽग्न्यभावे ग. । (२) ग्नेरप्यौपासना ख. ग. । (३) कल्पेनेति निर्देशाद् क. । (४) लक्ष्यते. ख. । (५) सद्भावादेको क० । (६) प्रतिषेधश्च दृश्यते ग० । (७) पुर्वमश्नन्त्यबु० ग० ।

पकल्पितम् । एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते ॥ इति ॥ २३६-२३७ ॥

दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम् ॥
कृत्वेदंविष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ॥ २३८ ॥

(वी० मी०) अन्नं हुतशेषातिरिक्तमपि पुरुषतृप्तिक्षमं दत्त्वा भाजनेषु 'परिविष्य पृथिवी ते पात्र'मिति मन्त्रेण पात्रस्याऽन्नभाजनस्याऽभिमन्त्रणं कृत्वा परिविष्टेऽन्ने द्विजस्य श्राद्धिब्राह्मणस्याङ्गुष्ठं 'इदंविष्णुरि'ति मन्त्रेण निवेशयेत् । एतदनन्तरमन्नोत्सर्गोऽन्नमिष्टमित्यादिश्लोकेनाऽन्यार्थपरेणापि वक्ष्यते । इह तदनभिधानं चानुत्सृष्टद्विजेष्टान्नपरिवेषणप्रतिपादकेनैव तदभिधाने ग्रन्थलाघवार्थम् ॥ २३८ ॥

(मिता०) अन्ननिवेदनम्—

दत्त्वान्नमिति । अन्नमोदनसूपपायसघृतादिकं भाजनेषु (१)दत्त्वा 'पृथिवी ते पात्र'मित्यादिना मन्त्रेण पात्राभिमन्त्रणं कृत्वा 'इदं विष्णुर्विचक्रमे' इत्यनयर्चा अन्ने द्विजाङ्गुष्ठं निवेशयेत् । तत्र च वैश्वदेवे यज्ञोपवीती विष्णो हव्यं रक्षेति । पित्र्ये प्राचीनावीती विष्णो कव्यं रक्षेति । 'विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमात्' । इति मनुस्मरणात् ॥ २३८ ॥

सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचम् ॥
जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ॥ २३९ ॥

(वी० मि०) व्याहृतित्रययुक्तां सावित्रीमृचं मधुवाता इत्यादित्र्यृचं च जप्त्वा यथासुखं जुषध्वमिति ब्राह्मणानुद्दिश्य श्राद्धकर्त्रा वाच्यम् । तेऽपि ब्राह्मणा वाग्यता मौनयुक्ता भुञ्जीरन् । (२)अपिशब्देन हास्यवर्जनादि समुच्चिनोति ।

प्रहसन्निव यो भुङ्क्ते स नाप्याययते पितॄन् ।

इत्यादिदेवलवचनात् ॥ २३९ ॥

(मिता०) सव्याहृतिकामिति । अनन्तरं विश्वेभ्यो देवेभ्य इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेरिति यचोदकेन दैवे निवेद्य, तथा पित्रे अमुकगोत्रायामुकशर्मणे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेरिति तिलोदकप्रदानेन पित्रे निवेद्य, एवं पितामहाय प्रपि-

(१) कृत्वा ग० । (२) अपिशब्देन-इत्यारभ्य-वचनात्-इत्यन्तं क० पुस्तके नास्ति ।

तामहाय च निवेद्यानन्तरमापोशानं दत्त्वा पूर्वोक्ताभिर्व्याहृतिभिः सहितां गायत्रीं 'मधुवाता' इति तृचं मधुमधुमध्विति त्रिवारं जप्त्वा यथासुखं जुषध्वमिति ब्रूयात् । 'सङ्कल्प्य पितृदेवेभ्यः सावित्रीं मधुमज्जपः । श्राद्धं निवेद्यापोशानं जुषप्रैषोऽथ भोजनम्' ॥ तथा— 'गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृतिपूर्विकाम् । मधुवाता इति तृचं मध्वित्येतत्त्रिकं तथा' ॥ इति पारस्करादिवचनात् । भुञ्जीरंस्तेऽपि वाग्यताः । तेऽपि ब्राह्मणा वाग्यता मौनिनो भुञ्जीरन् ॥ २३९ ॥

अन्नमिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरः ॥

(वी० मि०) इष्टं स्वस्य ब्राह्मणस्य तदपि हविष्यमेव श्राद्धयोग्यमेवाऽक्रोधस्त्वरारहितश्च सन् ब्राह्मणेभ्यो दद्यात् । चकाराद्व्यञ्जनाद्युपकरणान्तरपरिग्रहः ॥

आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा ॥ २४० ॥
अन्नमादाय तृप्ताः स्थ शेषं चैवाऽनुमान्य च ॥
तदन्नं विकिरेद्भूमौ दद्याच्चाऽपः सकृत्सकृत् ॥२४१॥
सर्वमन्नमुपादाय सतिलं दक्षिणामुखः ॥
उच्छिष्टसन्निधौ पिण्डान् (१)दद्याद्वै पितृयज्ञवत् ॥२४२॥

आतृप्तेः ब्राह्मणतृप्तिपर्यन्तं पूर्वजपं व्याहृतिगायत्रीमधुवातादिरूपं जप्यं पवित्राणि पुरुषसूक्तादीनि तथाशब्दाद्रक्षोघ्न्यादीनि जप्त्वा श्राद्धशेषमन्नमादाय भूमौ विकिरेत् अग्निदग्धा इति मन्त्रेण प्रक्षिपेत्ततः सकृत्सकृत् इदं ते प्रत्यपोशानमित्यपो दद्यात् । ततः तृप्ताः स्थेति दृष्टेति शेषः, अर्थात् तृप्ताः स्मेति तैरुच्चरिते शेषं तच्छ्राद्धपाकीयमन्नं अनुमान्य शेषमन्नं किं क्रियतामिति श्राद्धकर्तृप्रश्नानन्तरमिष्टैः सह भुज्यतामिति ब्राह्मणान् प्रतिविषयतां प्राप्य सर्वं सर्वविधं सकलजातीयव्यञ्जनादिसहितमन्नं सतिलमुपादाय पिण्डाकारं कृत्वा ब्राह्मणोच्छिष्टसन्निधौ पितृयज्ञरीत्या पिण्डान् दाक्षिणाभिमुखः प्रदद्यात् । तुशब्देन तृप्त्यनन्तरं जपव्यवच्छेदः । शेषं चेति चकारो व्यञ्जनादिसमुच्चयः । एवकारो अनुमान्येत्यत्राऽन्वितोऽनुमत्याऽऽवश्यकत्वप्रदर्शनाय । द्वितीयचकारेण पिण्डमहे

---

(१) प्रदद्याद्–इति ख० पुस्तके पाठः ।

करिष्य इति प्रश्नसमुच्चयः। प्रश्नसामर्थ्यादुत्तरमपि बोध्यम्। दद्याश्चेति चकारेणाऽन्नविकिरिणोत्तरमाचमनं समुच्चिनोति। अत एवाचमने दक्षिणामुखत्वानिवृत्तेः। पुनस्तत्प्राप्त्यर्थं दक्षिणाभिमुख इत्युक्तम्। तच्चापो दद्यादित्यादौ सर्वत्रान्वितम् ॥२४०-२४२॥

(मिता०) अन्नमिष्टमिति। अन्नं भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं पञ्चविधं इष्टं यद्ब्राह्मणाय प्रेताय कर्त्रे वा रोचते। हविष्यं श्राद्धहविर्योग्यं व्रीहिशालियवगोधूममुद्गमाषमुन्यन्नकालशाकमहाशल्कैलाशुण्ठीमरीचहिङ्गुगुडशर्कराकर्पूरसैन्धवसांभरपनसनालिकेरकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृति स्मृत्यन्तरप्रसिद्धं वेदितव्यम्। हविष्यमित्यनेनैवायोग्यस्य स्मृत्यन्तरप्रतिषिद्धस्य कोद्रवमसूरचणककुलित्थपुलाकनिष्पावराजमाषकूष्माण्डवा(१)र्ताकबृहतीद्वयोपोदकीवंशाङ्कुरपिप्पलीवचाशतपुष्पो(२)षरविडलवणमाहिषचामरक्षीरदधिघृतपायसादीनां निवृत्तिः। अक्रोधनः क्रोधहेतुसंभवेऽपि। अत्वरोऽव्यग्रः। आतृप्तेर्दद्यादिति सम्बन्धः। तुशब्दाद्यथा किञ्चिदुच्छिष्यते तथा दद्यात्। उच्छेषणस्य दासवर्गभागधेयत्वात्। 'उच्छेषणं भूमिगतमजिह्मस्याशठस्य च। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते' ॥ इति (३।२४६) मनुस्मरणात्। तथा आतृप्तेः पवित्राणि पुरुषसूक्तपावमानीप्रभृतीनि जप्त्वा तृप्तान् ज्ञात्वा पूर्वोक्तं जपं च सव्याहृतिकामित्युक्तं जपेत् ॥ २४० ॥

(मिता०) अन्नमादायेति। अनन्तरं सर्व(३)मन्नमादाय तृप्ताः स्थ इति तैरुक्तः शेषमप्यस्ति किं क्रियतामिति पृष्ट्वा इष्टैः सहोपभुज्यतामित्यभ्युपगम्य तदन्नं पितृस्थानब्राह्मणस्य पुरस्तादुच्छिष्टसंनिधौ दक्षिणाग्रदर्भान्तरितायां भूमौ तिलोदकप्रक्षेपपूर्वकं 'ये अग्निदग्धा' इत्यनयर्चा निक्षिप्य पुनस्तिलोदकं निक्षिपेत्। तदनन्तरं ब्राह्मणहस्तेषु गण्डूषार्थं सकृत्सकृदपो दद्यात् ॥ २४१ ॥

(मिता०) पिण्डप्रदानम्—

सर्वमिति। पिण्डपितृयज्ञकल्पातिदेशेन चरुश्रपणसद्भावे अग्नौकरणाशिष्टचरुशेषेण सह सर्वमन्नमुपादायाग्निसंनिधौ पिण्डान्दद्यात्। तदभावे ब्राह्मणार्थं (४)कृतमन्नं सर्वमुपादाय सतिलं तिलमिश्रं दक्षि-

(१) वृंताकबृहती क०। (२) पुष्पोपाधिविड क० पुष्पोषरविड ख०।
(३) प्रकिरेत क०। (४) सार्ववर्णिकमन्नमुपादाय क०।

णामुख उच्छिष्टसंनिधौ पिण्डपितृयज्ञकल्पेन पिण्डान् दद्यात् ॥२४२॥

(वी० मि०) पित्रादिकश्राद्धक्रमं मातामहादित्रयश्राद्धेऽप्यतिदिशति—

मातामहानामप्येवं दद्यादाचमनं ततः ॥

आद्यर्थकबहुवचनेन त्रिकसङ्ग्रहः । अपिशब्देनाभ्युदायिके मात्रादित्रिकसङ्ग्रहः । ततः पिण्डदानानन्तरं श्राद्धिब्राह्मणेभ्य आचमनीयं दद्यात् ।

गन्धादीन्निःक्षिपेत्तूष्णीं तत आचामयेत् द्विजान् ।

इति वचनात् ॥

स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च ॥ २४३ ॥

(वी० मि०) ततो ब्राह्मणाचमनानन्तरं स्वस्तिपदं वाच्यं ब्राह्मणद्वारा वाचनीयं यत्र तत् स्वस्तिवाच्यं स्वस्तिवाचनमिति यावत् । अत्र स्वस्त्युच्यतामिति प्रैषानन्तरं ब्राह्मणैरस्तु स्वस्तीति वाच्यम् । इदन्तु स्वस्तिवाचनं याज्ञवल्क्यमतेऽधिकं कात्यायनादिभिरलिखितत्वात् । अक्षय्योदकं ॐ अद्याऽमुकगोत्रस्य पितुरमुकशर्मणे दत्ततदन्नपानादिकमक्षय्यमस्त्वित्यादि वाक्यैः तिलाज्यमधुयुक्तोदकदानं पित्रादिभ्यः षड्भ्यः कुर्यात् । अक्षय्यमुदकमस्मिन्निति व्यत्ययादानक्रियैवाऽक्षय्योदकशब्दार्थः । चो वार्थः । एवकारश्च स्वस्तिवाचनव्यवच्छेदार्थः । तेन स्वस्तिवाचनपूर्वकं तदपूर्वकं वाऽक्षय्योदकदानं कुर्यादिति पर्यवस्यति ॥ २४३ ॥

(मिता०) अक्षय्योदकदानम्—

मतामहानामिति । मातामहानामपि विश्वेदेवावाहमादिपिण्डप्रदानपर्यन्तं क(१)र्मैवमेव कर्तव्यम् । अनन्तरं ब्राह्मणानामाचमनं दद्यात् । स्वस्तिवाच्यं ततः कुर्यात् स्वस्ति-इति ब्रूतेति ब्राह्मणान्स्वस्ति वाचयेत् । तैश्च स्वस्तीत्युक्ते अक्षय्यमस्त्विति ब्रूतेति ब्राह्मणहस्तेपूदकदानं कुर्यात् । तैश्चाक्षय्यमस्त्विति वक्तव्यम् ॥ २४३ ॥

दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ॥

वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यताम् ॥ २४४ ॥

---

(१) कर्मैवं कर्तव्यं ग. ।

ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम् ॥

(वी० मि०) अनन्तरं स्वशक्त्यनुसारेण हिरण्यरजतरूपां देवपितृश्राद्धयोर्दक्षिणां ब्राह्मणेभ्यो दत्त्वा स्वधाकारमुदाहरेत् । स्वधां वाचयिष्य इति ब्राह्मणान् प्रतिवदेत् । ततो वाच्यतामिति ब्राह्मणैरनुज्ञातः प्रकृतेभ्यः पितृपितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यः स्वधोच्यतामिति ब्राह्मणान् प्रतिवदेत् । एवमुक्ते सति च ब्राह्मणा अस्तु स्वधेति ब्रूयुः । भूमौ भूमिसंलग्नेषु सपवित्रकुशाच्छादितेषु पिण्डेषु 'जलमूर्जं वहन्ति'रित्यादिमन्त्रेण सिञ्चेत् । दक्षिणाभिमुखधारारूपेण क्षिपेत् । यदाह छन्दोगपरिशिष्टम् —

पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् ।

अत्र स्वधावाचनात्पूर्वं दक्षिणादानं कल्पान्तरं कात्यायनादिभिर्विपरीतक्रमाभिधानात् ॥

विश्वेदेवाश्च प्रीयन्तां विप्रैश्चोक्त इदं जपेत् ॥२४५॥
दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥
श्रद्धा च नो माविगमद्बहु देयं च नोऽस्त्विति ॥ २४६ ॥

(वी० मि०) विश्वेदेवाः प्रीयन्तां इत्युदाहरेदिति सम्बध्यते। चकारेणैतत्पूर्वकृत्यं पिण्डोत्थापनं समुच्चीयते । अथ श्राद्ध(१)विप्रैः प्रीयन्तामित्युक्ते सति 'दातार' इत्यादिकं जपेत् । चकारेण 'गोत्रं नो वर्द्धता'मिति श्राद्धकर्तृवचनं वर्द्धतामिति ब्राह्मणैन प्रतिवचनं समुच्चिनोति । इतिकारो न समाप्त्यर्थः किन्तूपक्रमार्थकः । तेन—

अन्नं (२)च नो बहु भवेदतिथींश्च लभेमहि ।
याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥

एताः सत्याशिषः सन्तु—

इत्येतत्पर्यन्तस्य जपः सिद्ध्यति ॥ २४४–२४६ ॥

(मिता०) स्वधावाचनम्—

दत्त्वेति । अनन्तरं यथाशक्ति हिरण्यरजतादिदक्षिणां दत्त्वा स्वधां वाचयिष्य इत्युक्त्वा तैर्ब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः

(१) श्राद्धविप्रैः—इति ख० पु० पाठः ।

(२) अन्नं च—इत्यारभ्य सन्तु–इत्येतत्पर्यन्तं क० पुस्तके नास्ति ।

पित्रादिभ्यो मातामहादिभ्यश्च स्वधोच्यतामिति स्वधाकारमुदाहरेत् ॥ २४४ ॥

(मिता०) ब्रूयुरिति । ते च ब्राह्मणा अस्तु स्वधेति ब्रूयुः । तैरेवमुक्ते अनन्तरं कमण्डलुना उदकं भूमौ सिञ्चेत् । ततो विश्वदेवाः प्रीयन्तामिति ब्रूयात् । ब्राह्मणैश्च प्रीयन्तां विश्वेदेवा इत्युक्ते इदमनन्तरोच्यमानं जपेत् ॥ २४५ ॥

(मिता०) ब्राह्मणप्रार्थना—

दातार इति । दातारो हिरण्यादेः नोऽस्माकं कुलेऽभिवर्धन्तां बहवो भवन्तु । वेदाश्च वर्धन्तां अध्ययनाध्यापनतदर्थज्ञानानुष्ठानद्वारेण । सन्ततिश्च पुत्रपौत्रादिपरम्परया । श्रद्धा च पित्र्ये कर्मण्यास्था नोऽस्माकं माविगमत् मा गच्छतु । 'न माङ्योगे' इत्यडभावः । देयं च हिरण्यादि बहु अपर्यन्तं अस्माकं भवत्विति जपेदित्यन्वयः २४६

इत्युक्त्वोक्त्वा(१) प्रिया वाचः प्रणिपत्य विसर्जयेत् ॥
वाजेवाज इति प्रीतान् पितृपूर्वं विसर्जनम् ॥ २४७ ॥

इति दातार इत्याद्युक्ताः प्रियाश्च ब्राह्मणप्रीतिकराश्च वाचः उक्त्वा दक्षिणाग्रहणेन प्रीतान् ब्राह्मणान् प्रणिपत्य 'वाजे वाजेवा'त्यादिमन्त्रेण विसर्जयेत् स्वस्थानगमनार्थमभ्यनुजानीयात् । देवपूर्वकत्वस्य औत्सर्गिकस्याऽत्रापवादार्थमाह–पितृपूर्वमिति । विसर्जनं पितृब्राह्मणपूर्वकं कार्यमित्यर्थः । प्रीतानित्यत्र प्रीत इति क्वचित्पाठः ॥ २४७ ॥

(मिता०) इत्युक्त्वेति । एवं पूर्वोक्तं प्रार्थनामन्त्रं जप्त्वा, उक्त्वा च प्रिया वाचः धन्या वयं भवच्चरणयुगलरजःपवित्रीकृतमस्मन्मन्दिरं शाकाद्यशनक्लेशमविगणय्य भवद्भिरनुगृहीता वयमित्येवंरूपाः । प्रणिपत्य प्रदक्षिणापूर्वं नमस्कृत्य विसर्जयेत् । कथं विसर्जयेदित्याह–'वाजे वाजेवत वाजिनोनः' इत्यनयर्चा पितृपूर्वं प्रपितामहादि विश्वेदेवान्तं दर्भान्वारम्भेण 'उत्तिष्ठन्तु पितर' इति प्रीतः सुप्रीतमना विसर्जनं कुर्यात् ॥ २४७ ॥

(वी० मि०) उक्त एव विसर्जनेऽर्घ्यपात्रोत्तानीकरणोत्तरकालक

(१) इत्युक्त्वा च—इति ख० पुस्तके पाठः ।

तच्चयत्वरूपं विशेषमाह—

यस्मिंस्ते संस्रवाः पूर्वमर्घ्यपात्रे निवेशिताः॥
पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत् ॥ २४८ ॥

यस्मिन्नर्घ्यपात्रे तेऽर्घ्यसम्बन्धिनः संस्रवाः शेषजलरूपाः पूर्वं निवेशिता धृतास्तत्पितृपात्रं पूर्वं न्युब्जीकृतमुत्तानं कृत्वा विप्रान्विसर्जयेदित्यर्थः। पितृपात्रोत्तानीकरणेनाऽर्थतः पितामहप्रपितामहपात्रयोर्मातामहानामप्येवमतिदेशता मातामहादिपात्राणामुत्तानीकरणमिति स्पष्टत्वाद्विशिष्य ग्रन्थकृता नोक्तम् ॥ २४८ ॥

(मिता०) यस्मिन्निति । यस्मिन्नर्घ्यपात्रे पूर्वमर्घ्यदा(१)नान्ते संस्रवा ब्राह्मणहस्तगलितार्घ्योदकानि निवेशिताः स्थापितास्तदर्घ्यपात्रं न्युब्जं तदुत्तानमूर्ध्वमुखं कृत्वा विप्रान्विसर्जयेत्। एतच्चाशीर्मन्त्रजपादूर्ध्वं वाजेवाजे इत्यतः प्राग्द्रष्टव्यम्। कृत्वा विसर्जयेदिति क्त्वाप्रत्ययश्रवणात् ॥ २४८ ॥

प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम् ॥

(वी० मि०) (२)विसृष्टान् ब्राह्मणान् गच्छतः प्रदक्षिणं यथा स्यादेवमनुव्रज्याऽनुगम्य पितृसेवितं श्राद्धावशिष्टान्नं भुञ्जीत । अत्र विशेषो मत्स्यपुराणे—

वहिः प्रदक्षिणं कुर्यात्पदान्यष्टावनुव्रजेत् ।
बन्धुवर्गेण सहितः पुत्रभार्यासमन्वितः ॥

अत्र चैकादश्यादौ शेषान्नस्य भोजनाभावेऽप्याघ्राणमात्रेण शास्त्रार्थनिर्वाहः। 'एकादश्यादौ पित्र्यमाघ्रेयं तच्चैव प्राशितं नैवाप्राशितं भवती'ति कालादर्शे लिखितश्रुतेरित्याहुः॥

ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह ॥ २४९ ॥

(वी० मि०) तां रजनीं तदहोरात्रं व्याप्य ब्रह्मचारी—

स्मरणं कीर्त्तनं केलीः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।

---

(१) दानानन्तरं ते संस्रवा ग.।
(२) वि ष्टान्—इत्यारभ्य पितृसेवितं-इत्येतावान ग्रन्थः क॰ पुस्तके नास्ति ।

इत्युक्ताऽष्टविधमैथुननिवृत्तिमान् श्राद्धिब्राह्मणैः सह भवेदित्यर्थः । श्राद्धीयब्राह्मणा अपि ब्रह्मचारिणो भवेयुरिति यावत् । तुशब्देन ऋतुमत्या अपि भार्याया गमनं तस्यां रजन्यां व्यवच्छिद्यते । एवञ्च ऋतुगमनयोग्यरात्र्यन्तरासम्भवे श्राद्धकर्त्रा श्राद्धिब्राह्मणैश्च तदनुगमनं न कार्यमेव । शिष्टाचारोऽप्येवमिति नात्र युक्त्यन्तरगवेषणं क्रियत इति दिक् ॥ २४९ ॥

(मिता०) प्रदक्षिणमिति । अनन्तरमासीमान्तं ब्राह्मणाननुव्रज्य तैरास्यतामित्यनुज्ञातस्तान्प्रदक्षिणीकृत्य प्रतिनिवृत्तः पितृसेवितं श्राद्धशिष्टमिष्टैः सह भुञ्जीत । नियम एवायं न परिसंख्या । मांसे तु यथारुचीति द्विजकाम्ययेत्यत्रोक्तम् । यस्मिन्दिने श्राद्धं कृतं तत्सम्बन्धिनीं रात्रिं भोक्तृभिर्ब्राह्मणैः सह कर्ता ब्रह्मचारी भवेत् । तुशब्दात्पुनर्भोजनादिरहितोपि भवेत् । 'दन्तधावनताम्बूलं स्निग्धस्नानमभोजनम् । रत्यौषधपरान्नानि श्राद्धकृत्सप्त वर्जयेत् ॥ पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहं होमं श्राद्धभुक्त्वष्ट वर्जयेत्' ॥ इति वचनात् ॥ २४९ ॥

(वी० मि०) सर्वश्राद्धप्रकृतित्वेन प्रथमं पार्वणमभिधाय तद्विकृतिभूतेष्वाभ्युदयिकैकोद्दिष्टसपिण्डीकरणेषु विशेषानाह पञ्चभिः—

एवं प्रदक्षिणावृत्को वृद्धौ नान्दीमुखान् पितॄन् ॥
यजेत दधिकर्कन्धूमिश्रान् पिण्डान् यवैः क्रियाः ॥२५०॥

एवं पार्वणरीत्या वृद्धौ पुत्रजन्मकन्याविवाहादौ । अत्र तु विशेषः प्रदक्षिणा आवृत् अनुक्रमो यस्य स यजमानः । तेनाऽप्रदक्षिणत्वस्य पार्वणोक्तस्य बाधः। एतच्च सकलपित्र्यधर्मनिषेधोपलक्षणम् । नान्दीमुखानित्यनेन नान्दीमुखत्वविशिष्टानां पित्रादीनां देवतात्वमुक्तं, तेन 'नान्दीमुखपित'रित्यादिप्रयोगः सिध्यति । दधि प्रसिद्धं, कर्कन्धूर्बदरीफलं, ताभ्यां मिश्रान् पिण्डान् प्रकृतश्राद्धद्रव्यनिर्मितान् कुर्यात् । पिण्डरहितमप्याभ्युदयिकश्राद्धमाधुनिकशिष्टा आचरन्ति । तस्मिंस्तु पक्षे—

अग्नौकरणमर्घ्यं चाऽऽवाहनं चाऽवनेजनम् ।
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने विवर्जयेत् ॥

इति वचनादग्नौकरणादिबाधः । यवैश्च तिलसाध्याः सर्वाः

कार्याः 'यवैस्तिलार्थे' इति कात्यायनोक्तेः। पितृशब्देन चात्र मात्रादित्रिकमप्युपलक्ष्यते।

मातृश्राद्धं तु पूर्वं स्यात् पितॄणां तदनन्तरम्।
ततो मातामहादीनां वृद्धौ श्राद्धत्रयं स्मृतम्॥

इति शातातपवचनात्। मातॄणां श्राद्धं मातृश्राद्धम्। अत्र चाऽन्ये स्वधापदस्थाने स्वाहापदप्रयोगाद्या विशेषाः स्मृत्यन्तरेभ्योऽवगन्तव्याः। एवं वक्ष्यमाणैकोद्दिष्टसपिण्डनयोरपि पार्वणविशेषरूपास्ते ते शेषा इहाऽनुक्ता ग्रन्थान्तरेषु द्रष्टव्याः। विशिष्य तु ग्रन्थगौरवभयान्नेह प्रदर्श्यन्ते॥ २५०॥

(मिता०) एवं पार्वणश्राद्धमुक्त्वेदानीं वृद्धिश्राद्धमाह—

एवमिति। वृद्धौ पुत्रजन्मादिनिमित्ते श्राद्धे। एवमुक्तेन प्रकारेण पितॄन्यजेत पूजयेत्। तत्र विशेषमाह-प्रदक्षिणावृत्क इति। प्रदक्षिणा आवृत् अनुष्ठानपद्धतिर्यस्यासौ प्रदक्षिणावृत्कः प्रदक्षिणप्रचार इति यावत्। नान्दीमुखानिति पितॄणां विशेषणम्। अतश्चावाहनादौ नान्दीमुखान्पितॄनावाहयिष्ये नान्दीमुखान्पितामहानित्यादिप्रयोगो द्रष्टव्यः। कथं यजेतेत्याह-दधिकर्कन्धूमिश्रान्। कर्कन्धूर्वदरीफलम्। दध्ना वदरीफलैश्च मिश्रान्पिण्डान्दत्त्वा यजेतेति सम्बध्यते। तिलसाध्याः सर्वाः क्रिया यवैः कर्तव्याः। अत्र च ब्राह्मणसंख्या दर्शितैव 'युग्मान्दैवे यथाशक्ति' इत्यत्र। प्रदक्षिणावृत्कत्वादिपरिगणनमन्येषामपि स्मृत्यन्तरोक्तानां विशेषधर्माणां प्रदर्शनार्थम्। यथाहाऽऽश्वलायनः-'अथाभ्युदयिके युग्मा ब्राह्मणा अमूला दर्भाः प्राङ्मुखो यज्ञोपवीती स्यात्प्रदक्षिणमुपचारो यवैस्तिलार्थो गन्धादिदानं द्विर्द्विः ऋजुदर्भानासने दद्यात्। यवोसि सोमदेवत्यो गोसवे देवनिर्मितः। प्रत्नवद्भिः प्रत्तः पुष्ट्या नान्दीमुखान्पितॄनिमाँल्लोकान्प्रीणयाहि नः स्वाहा' इति यवावपनम्। विश्वेदेवा इदं वोऽर्घ्यं, नान्दीमुखाः पितर इदं वोऽर्घ्यमिति यथालिङ्गमर्घ्यदानम्। पाणौ होमोऽग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति। 'मधुवाता ऋतायते' इति तृचस्थाने 'उपास्मै गायत' इति पञ्च मधुमतीः श्रावयेत्। 'अक्षन्नमीमदन्त' इति षष्ठीम्। आचान्तेषु भुक्ताशयान्गोमयेनोपलिप्य प्राचीनाग्रान्दर्भान्संस्तीर्य तेषु पृषदाज्यमिश्रेण भुक्तशेषेणैकैकस्य द्वौ द्वौ पिण्डौ दद्यादित्यादि। यद्यपि पितॄन्यजेतेति सामान्येनोक्तं

तथापि श्राद्धत्रयं क्रमश्च स्मृत्यन्तरादवगन्तव्यः। यथाह शातातपः—'मातुः श्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम्। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्' ॥ इति ॥ २५० ॥

एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ॥
आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥ २५१ ॥

उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने ॥
अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्म ह ॥ २५२ ॥

(वी०मि०)एकमेवोमुद्देशविषयो यस्मिन् तदेकोद्दिष्टं प्रेतश्राद्ध-सांवत्सरिकादि, दैवं विश्वेदेवश्राद्धं, तद्वर्जितं, एक एवार्घ्यो यत्र तदेकार्घ्यं,एकमेव पात्रन्यसनीयं पवित्रं यत्र तदेकपवित्रकं,अनयोः कर्म-धारयः। आवाहनेनाऽग्नौकरणेन रहितं, अपसव्यवत् अपसव्यादिपार्वणधर्मयुक्तम्। अनेन सन्निहितवृद्धिश्राद्धप्रकृतिकत्वव्युदासः। अत्र च देवश्राद्धादेः प्रकृतिविकृतिन्यायेन प्रसक्त्या निषेधः। यद्वा तत्पर्युदासे पार्वणधर्मान्तराभ्यनुज्ञानमिति बोध्यम्। अत्र चाऽर्घ्यैक्यादेव पवित्रैक्यलाभे (१)तदभिधानमेकपात्रात्मकपवित्रलाभार्थमित्यपव्याख्यानं श्रुतिप्राप्तेऽर्थे न्यायानवकाशात्। अन्यथैकोद्दिष्टत्वादेवार्घ्यैक्ये लब्धे एकार्घ्यमिति व्यर्थं स्यादिति दिक्। हिशब्दो हेतौ, एकोद्दिष्टत्वस्य एकार्घ्यैकपवित्रकत्वबीजत्वात्। उपतिष्ठतामित्यादि। तत्र चाऽक्षय्योदकदानवाक्यस्थितस्याऽक्षय्यमस्त्वित्यस्य स्थाने उपतिष्ठतामिति वदेत्। विप्रविसर्जने वाजेवाज इति मंत्रस्थानेऽभिरम्यतामिति वदेत्। ते च श्राद्धिब्राह्मणपक्षे। हशब्दः पादपूरणे, 'तु हि च स्म ह वै पादपूरणे' इत्यमरकोशात् ॥ २५१–२५२ ॥

(मिता०) एकोद्दिष्टमाह—

एकोद्दिष्टमिति। एकोद्दिष्टं एक उद्दिष्टो यस्मिन् श्राद्धे तदेकोद्दिष्टमिति कर्मनामधेयम्। शेषं पूर्ववदाचरेदित्युपसंहारात्। पार्वणसकलधर्मप्राप्तौ विशेषोऽभिधीयते। दैवहीनं विश्वेदेवरहितं एकार्घ्यपात्रमेकदर्भपवित्रकं च आवाहनेनाग्नौकरणहोमेन च रहितम्।

(१) भावे—इति क० पु० पाठः।

अपसव्यवत् प्राचीनावीतब्रह्मसूत्रवत्। अनेनानन्तरोक्ताभ्युदयिके यज्ञोपवीतित्वं सूचयति ॥ २५१ ॥

(मिता०) किंच—

उपतिष्ठतामिति। यदुक्तं—'स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च' इति तत्राक्षय्यस्थाने उपतिष्ठतामिति वदेत्। विप्रविसर्जने कर्तव्ये 'वाजेवाजे' इति जपान्ते दर्भान्वारम्भेणाभिरम्यतामिति ब्रूयात्। ते चाभिरताः स्म इति ब्रूयुः। इ प्राक्षिद्धम्। शेषं पूर्ववदिति यावत्। एतच्च मध्याह्ने कर्तव्यम्। यथाह देवलः–'पूर्वाह्णे दैविकं कर्म अपराह्णे तु पैतृकम्। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्' ॥ इति। भुञ्जीत पितृसेवितमित्यस्यैकोद्दिष्टविशेषे निषेधो दृश्यते। 'नवश्राद्धेषु यच्छिष्टं गृहे पर्युषितं च यत्। दंपत्योर्भुक्तशिष्टं च न भुञ्जीत कदाचन' ॥ इति। नवश्राद्धं च दर्शितम्। 'प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे तथा। नवमैकादशे चैव तन्नवश्राद्धमुच्यते' ॥ इति ॥ २५२ ॥

> गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् ॥
> अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥ २५३ ॥
> ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ॥
> एतत्सापिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि ॥ २५४ ॥

(वी० मि०) पात्रचतुष्टयं गन्धोदकतिलैर्युक्तमर्घ्यार्थं सपिण्डीकरणे कुर्यात्। तत्र पात्रचतुष्टयमध्ये पितृणां यैः सह प्रेतस्य सपिण्डीकरणं तेषां पात्रेषु संस्रववत्सु प्रेतपात्रस्थं संस्रवं 'ये समानाः समनस' इत्यादिभ्यां तृज्भ्यां प्रसेचयेत् योजयेत्। प्रेतपात्रास्थितत्वविशिष्टस्यैव संस्रवस्य सेचनलाभाय प्रेतपात्रपदेन लक्षणया संस्रवो बोधितः। प्रशब्देन सामान्यतो विहिताध्योत्सर्गाबाधपुरस्सरत्वलक्षणः। जलविभागपूर्वकत्वलक्षणश्च प्रकर्ष उक्तः।

> ये समाना इति द्वाभ्यामाद्यन्तु विभजेत्त्रिधा।

इति पिण्डं प्रक्रम्याऽभिधाय—

> एष एव विधिः पूर्वमर्घ्यपात्रचतुष्टये।

इति वचनात्। शेषमविरुद्धमाकाङ्क्षितं च धर्मं पूर्ववत् पार्वण-

वदाचरेत् कुर्यात्। ननु पात्रचतुष्टयमित्यादिनाऽनेकोद्देश्यकत्वला-भात्सपिण्डीकरणस्य पार्वणत्वे प्रसक्ते स्त्रीकर्तृकत्वाभावं स्त्र्युपदेश्य-कत्वाभावं च स्मृत्यन्तरसिद्धमापद्येतेति शङ्कायामस्यैकोद्दिष्टत्वमाह। एतत्सपिण्डीकरणं प्रेतोद्देश्यकान्नत्यागरूपमेकोद्दिष्टमतः स्त्रियाः कलापम(?)। अपिशब्दात् स्त्रियैव ॥ २५३-२५४ ॥

(मिता०) सपिण्डीकरणमाह—

गन्धोदकतिलैरिति । ये समाना इति । गन्धोदकतिलैर्युक्तं पात्रचतुष्टयं अर्घ्यसिद्ध्यर्थं पूर्वोक्तविधिना कुर्यात्। तिलैर्युक्तं पात्रच-तुष्टयमिति वदता पितृवर्गे चत्वारो ब्राह्मणा दर्शिताः। वैश्वदेवे द्वौ स्थितावेव । अत्र प्रेतपात्रोदकं किंचिदवशेषं त्रिधा विभज्य पितृपा-त्रेषु सेचयेत् 'ये समानाः समनसः' इति द्वाभ्यां मन्त्राभ्याम्। शेषं विश्वेदेवावाहनादिविसर्जनान्तं पूर्ववत्पार्वणवदाचरेत् । प्रेता-र्घ्यपात्रावशिष्टोदकेन प्रेतस्थानब्राह्मणहस्तेऽर्घ्यं दत्त्वा शेषमेकोद्दि-ष्टवत्समापयेत्। पित्र्येषु त्रिषु पार्वणवत् एतत्सपिण्डीकरणमनन्त-रोक्तमेकोद्दिष्टं च ।ततः प्रागुक्तं स्त्रिया अपि मातुरपि कर्तव्यम्। एवं वदता पार्वणं मातृश्राद्धं पृथक्कर्तव्यमित्युक्तं भवति। अत्र प्रेतशब्दं पितुः प्रपितामहविषयं केचिद्वर्णयन्ति। तस्य त्रिष्वन्तर्भावेन सपि-ण्डीकरणोत्तरकालं पिण्डदानादिनिवृत्त्युपपत्तेः। समनन्तरमृत(१)-स्योत्तरत्र पिण्डोदकदानानुवृत्तेरन्तर्भावो न युक्तः। अत एवाह यमः—'यः सपिण्डीकृतं प्रेतं पृथक्पिण्डे नियोजयेत्। विधिघ्नस्तेन भवति पितृहा चोपजायते' ॥ इति। प्रकर्षेण इतः प्रेत इति चतुर्थे-ऽपि प्रेतशब्दोपपत्तेः। 'प्रेतेभ्य एव निपृणीयात्' इति च प्रयोग-दर्शनात्। अपि च—'सपिण्डीकरणं श्राद्धं देवपूर्वं नियोजयेत्। पितॄनेवाशयेत्तत्र पुनः प्रेतं न निर्दिशेत्' ॥ इति सपिण्डीकरणोत्त-रकालं प्रेतस्य श्राद्धादिप्रतिषेधो दृश्यते स चानन्तरमृतस्य न सम्भवति अमावास्यादौ श्राद्धविधानात्। 'सापिण्डता तु पुरुषे सप्तमे विनिवर्तते' इत्येतदपि वचनं चतुर्थस्य त्रिष्वन्तर्भाव एव घटते 'चतुर्थस्य पिण्डत्रयव्यापित्वं पञ्चमस्य पिण्डद्वयव्यापित्वं षष्ठस्यै-कपिण्डव्यापित्वं सप्तमे विनिवृत्तिः' इति । पितृपात्रेष्वित्येतदपि पितृमुख्यत्वादस्मिन्नेव पक्षे घटते नान्यथा, पितामहप्रमुखत्वात् ।

(१) मृतस्य पिण्डोदक क. ।

तस्मात्पितृपात्रेषु प्रसेचयेदिति, पितुः प्रपितामहपात्रं पित्रादिपात्रेषु प्रसेचयेदिति तदयुक्तम्। न ह्यत्र पिण्डसंयोजनमुत्तरत्र पिण्डदानादिनिवृत्तिप्रयोजकम्, अपि तु पितुः प्रेतत्वनिवृत्त्या पितृत्वप्राप्त्यर्थम्। प्रेतत्वं च क्षुत्तृष्णोपजनितात्यन्तदुःखानुभवावस्था। यथाह मार्कण्डेयः—'प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता। क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनन्दन' ॥ इति। पितृत्वप्राप्तिश्च वस्वादिश्राद्धदेवतासम्बन्धः। प्राक्तनैकोद्दिष्टसहितेन सपिण्डीकरणेन प्रेतत्वनिवृत्त्या पितृत्वं प्राप्नोतीत्यवगम्यते। 'यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश। प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि' ॥ इति। तथा—'चतुरो निर्वपेत्पिण्डान् पूर्वं तेषु स(१)मावपेत्। ततःप्रभृति वै प्रेतः पितृसामान्यमश्नुते' ॥ इत्यादिवचनात्। 'यः सपिण्डीकृतं प्रेतम्' इत्यनेनापि पृथगेकोद्दिष्टविधानेन पिण्डदाननिषेधात्पार्वणविधानेन सह पिण्डदानमवगम्यते। त(२)च्च सांवत्सरिकपाक्षिकैकोद्दिष्टविधा(३)नेनापोद्यते। यदपि पुनः प्रेतं न निर्दिशेदिति, तदपि प्रेतशब्दं नोच्चारयेत् अपि तु पितृशब्दमेवेत्येवमर्थम्। न च प्रकर्षगमनात्तत्रैव प्रेतशब्दः। यतो विशिष्टदुःखानुभवावस्था प्रेतशब्देन रूढ्याभिधीयत इत्युक्तम्। योऽपि प्रमीतमात्रे प्रेतशब्दप्रयोगः सोऽपि भूतपूर्वगत्या। 'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते' इति च प्रथमस्य पिण्डस्य चतुर्थव्यापित्वात् द्वितीयस्य पञ्चमव्यापित्वात् तृतीयस्य षष्ठव्यापित्वात् सप्तमे विनिवर्तत इत्येवमपि घटते। अपि च निर्वाप्यपिण्डान्वयेन न सापिण्ड्यम(४)व्यापकत्वात्, अपित्वेकशरीरावयवान्वयेनेत्युक्तम्। पितृशब्दश्च प्रेतत्वनिवृत्त्या श्राद्धदेवता(५)भूयं गतेषु वर्तत इति पितृपात्रेष्वित्यविरुद्धम्। तस्मादनन्तराचार्येण पूर्वपक्षद्वारेण परमतं दर्शितमित्यर्थः। मृतपात्रोदकस्य तत्पिण्डस्य च पितृपात्रेषु तत्पिण्डेषु च संसर्जनमिति स्थितम्। आचार्यस्तु परमतमेवोपन्यस्तवान्। एतच्च पितुः सपिण्डीकरणं पितामहादिषु त्रिषु प्रमीतेषु वेदितव्यम्। पितरि प्रेते पितामहे प्रपितामहे वा जीवति सपिण्डीकरणं नास्त्येव। 'व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता' इति वच-

(१) समानयेत् क. समापयेत् ख.। (२) एतच्च ख०।
(३) विधानेनोपपद्यते क० विधानायोपपाद्यते ख०। (४) अव्यापित्वादपि तु क०।
(५) देवतात्वमुपगतेषु ख०।

नात्। यत्तु मनुवचनं (३।२२१)—'पिता यस्य निवृत्तः स्याज्जीवेच्चापि पितामहः। पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहम्' ॥ इति, तदपि पितृशब्दप्रयोगनियमाय न पिण्डद्वयदानार्थम्। कथम्—'म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्। पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः' ॥ सोऽपि पूर्वेषामेव निर्वपेदित्यन्वयः। पक्षद्वयेऽपि कथं निर्वपेदित्याह—'पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहम्' इत्याद्यन्तग्रहणेन सर्वत्र पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इत्येवं प्रयोगो न पुनः कदाचिदपि पितामहस्य प्रपितामहस्य वाऽऽदित्वं वृद्धप्रपितामहस्य तत्पितुर्वान्तत्वम्। अतश्च पित्रादिशब्दानां सम्बन्धिवचनत्वात् म्रियमाणेऽपि पितरि पितुः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति, पितामहे म्रियमाणे पितामहस्य पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति। अतश्च पिण्डपितृयज्ञे 'शुन्धन्तां पितर—'इत्यादिमंत्राणामूहो न भवति। यदपि विष्णुवचनं—'यस्य पिता प्रेतः स्यात्स पितृपिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात्' इति। तस्यायमर्थः—पितामहे म्रियमाणे प्रेते च पितरि पितुरेकं पिण्डमेकोद्दिष्टविधानेन निधाय पितुर्यः पितामहस्ततः पराभ्यां द्वाभ्यां दद्यात्। पितामहस्त्वात्मनः प्रपितामहः संप्रदानभूतः स्थित एवेति प्रपितामहाय ततः पराभ्यां द्वाभ्यां च दद्यादिति। शब्दप्रयोगनियमस्तु पूर्वोक्त एव। एवं गोब्राह्मणादिहतस्यापि सपिण्डीकरणाभावो वेदितव्यः। यथाह कात्यायनः—'ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते। व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ' ॥ इति। गोब्राह्मणहतस्य पितुः सपिण्डीकरणसम्भवे तमुल्लंघ्य पितामहादिभ्यः पार्वणविधानमनुपपन्नमिति सपिण्डीकरणाभावोऽवगम्यते। स्मृत्यन्तरेऽपि—'ये नराः सन्ततिच्छिन्ना नास्ति तेषां सपिण्डता। न चैतैः सह कर्तव्यान्येकोद्दिष्टानि षोडश' ॥ इति। मातुः पिण्डदानादौ गोत्रे विप्रतिपत्तिः। भर्तृगोत्रेण पितृगोत्रेण वा दातव्यमिति उभयत्र वचनदर्शनात्। 'स्वगोत्राद् भ्रश्यते नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्तव्या तस्याः पिण्डोदकक्रिया' ॥ इत्यादिभर्तृगोत्रविषयं वचनम्। 'पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः। जन्मन्येव विपत्तौ च नारीणां पैतृकं कुलम्' ॥ इत्यादिपितृगोत्रविषयम्। एवं विप्रतिपत्तावासुरादिविवाहेषु पुत्रिकाकरणे च पितृगोत्रमेव। तत्र तत्र विशेष-

वचनात् दानस्यानिवृत्तेश्च । ब्राह्मादिविवाहेषु व्रीहियववत् बृहद्रथन्तरसामवत् विकल्प एव । तत्र च 'येनास्य पितरो याता येन याताः पितामहाः । तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यति' ॥ इति वचनात् वंशपरम्परायातसमाचरणेन व्यवस्था । एवंविधाविषयव्यतिरेकेणास्य वचनस्य विषयान्तराभावात् । यत्र पुनः शास्त्रतो न व्यवस्था नाप्याचारतस्तत्र 'आत्मनस्तुष्टिरेव वा' इति वचनादात्मनस्तुष्टिरेव व्यवस्थापिका, यथा–'गर्भाष्टमेऽष्टमे वाब्दे' इति । मातुः सपिण्डीकरणेऽपि वि(१)रुद्धानि वाक्यानि दृश्यन्ते तत्र–'पितामह्यादिभिः सार्धं सपिण्डीकरणं स्मृतम्' । तथा भर्त्रापि भार्यायाः स्वमात्रादिभिः सह सपिण्डीकरणं कर्तव्यमिति पैठीनसिराह–'अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डताम् । श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्' ॥ इति । पत्या सह सपिण्डीकरणं यम आह– 'पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः । सा मृ(२)तापि हि तेनैक्यं गता मंत्राहुतिव्रतैः' ॥ इति । उशनसा तु मातामहेन सह सपिण्डीकरणमुक्तम् । 'पितुः पितामहे यद्वत्पूर्णे संवत्सरे सुतैः । मातुर्मातामहे तद्वदेषा कार्या सपिण्डता' ॥ तथा–'पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः । माता मातामहे तद्वदित्याह भगवाञ्छिवः' ॥ इत्येवं विविधेषु वचनेषु सत्सु अपुत्रायां भार्यायां प्रमीतायां भर्ता स्वमात्रैव सापिण्ड्यं कुर्यात् । अन्वारोहणे तु पुत्रः स्वपित्रैव मातुः सापिण्ड्यं कुर्यात् । आसुरादिविवाहोत्पन्नः पुत्रिकासुतश्च मातामहेनैव । ब्राह्मादिविवाहोत्पन्नः पित्रा मातामहेन पितामह्या वा विकल्पेन कुर्यात् । अत्रापि यदि नियतो वंशसमाचारस्तदानीं तथैव कुर्यात् । वंशसमाचारोऽप्यनियतश्चेत्तदा 'आत्मनस्तुष्टिरेव च' इति यथारुचि कुर्यात् । तत्र च येन केनापि मातुः सापिण्ड्येऽपि यत्रान्वष्टकादिषु मातृश्राद्धं पृथग्विहितम्—'अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि । मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह' ॥ इति, तत्र पितामह्यादिभिरेव पार्वणश्राद्धं कर्तव्यम् । अन्यत्र पतिना सहेति पतिसापिण्ड्ये तदंशभागित्वात् । मातामहसापिण्ड्ये तदंशभागित्वात्तेनैव सह । यथाह शातातपः–'एकमूर्तित्वमायाति सपिण्डीकरणे कृते । पत्नी पतिपितॄणां च तस्मादंशेन भागिनी' ॥ इति । एवं सति

(१) विरुद्धानीषं ख० । (२) मृतापीदेतेनैक्यं क० ।

मातामहेन मातुः सापिण्ड्ये मातामहश्राद्धं पितृश्राद्धवन्नित्यमेव । पत्या पितामह्या वा मातुः सापिण्ड्ये मातामहश्राद्धं न नित्यम् । कृते अभ्युदयः, अकृते न प्रत्यवाय इति निर्णयः ॥ २५३-२५४ ॥

(वी० मि०) सोदकुम्भान्नदानरूपं प्रेतोद्देश्यकं श्राद्धमाह—

अर्वाक्सपिण्डीकरणं यस्य संवत्सराद्भवेत् ॥
तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजे ॥ २५५ ॥

वृद्ध्यादिना निमित्तेन संवत्सरादर्वाक् मरणदिनावधिकवत्सराभ्यां यस्य सपिण्डनं भवेत् तस्य प्रेतस्य सोदकुम्भमन्नं संवत्सरं द्विजे प्रतिपत्तिस्थाने दद्यात् । अपिशब्दात्सुतरामकृतसपिण्डीकरणो दद्यादिति सिद्ध्यति । प्रेतश्राद्धप्रकरणे पारस्करेण सोदकुम्भदानकथनात्सपिण्डीकरणेन निवृत्ते प्रेतत्वे श्राद्धमिदं न कार्यमिति भ्रमवारणार्थमेतद्वचनारम्भः । पारस्करवचने तु प्रेतपदं मृतमात्रपरमिति भावः २५५॥

(मिता०) अर्वागिति । संवत्सरादर्वाक्सपिण्डीकरणं यस्य कृतं तस्य तदुद्देशेन प्रतिदिवसं प्रतिमासं वा यावत्संवत्सरं शक्त्यनुसारेणान्नमुदकुम्भसहितंब्राह्मणाय दद्यात् । अर्वाक्संवत्सरादिति वदता सपिण्डीकरणं संवत्सरे पूर्णे प्राग्वेति दर्शितम् । यथाहाश्वलायनः–'अथ सपिण्डीकरणं संवत्सरान्ते द्वादशाहे वा' इति । कात्यायनोऽप्याह–'ततः संवत्सरे पूर्णे सपिण्डी(१)करणं त्रिपक्षे वा(२)द्वादशाहे यदहर्वा वृद्धिराप(३)द्यते' इति । द्वादशाहे त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वेति चत्वारः पक्षा दर्शिताः । तत्र द्वादशाहे पितुः सपिण्डीकरणं साग्निकेन कार्यम् । सपिण्डीकरणं विना पिण्डपितृयज्ञासिद्धेः । 'साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान्भवेत् । द्वादशाहे तदा कार्यं सपिण्डीकरणं पितुः' ॥ इति वचनात् । निराग्निकस्तु त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वा कुर्यात् । यदा प्राक्संवत्सरात्सपिण्डीकरणं तदा षोडश श्राद्धानि कृत्वा सपिण्डीकरणं कार्यम्, उत सपिण्डीकरणं कृत्वा पश्चात् स्वस्वकाले तानि कर्तव्यानीति संशयः, उभयथा वचनदर्शनात् । 'श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिण्डताम् । श्राद्धानि षोडशापाद्य विदधीत सपिण्डताम्' ॥ इति । षोडश श्राद्धानि च–'द्वादशाहे त्रि-

(१) करणं भवेत् ख. । (२) त्रिपक्षे वा यदा चार्वाग्वृद्धिरिति मुद्रितपुस्तकस्थः पाठः ।
(३) द्यते तदोत ख० ।

पक्षे च षण्मासे मासि चाब्दिके। श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः'॥ इति दर्शितानि। तथा—'यस्यापि वत्सरादर्वाक्सपिण्डीकरणं भवेत्। मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम्' ॥ इति। तत्र सपिण्डीकरणं कृत्वा स्वकाले एवैतानि कर्तव्यानीति प्रथमः कल्पः। अप्राप्तकालत्वेन प्रागनधिकारात्। यदपि वचनं 'षोडश श्राद्धानि कृत्वैव सपिण्डीकरणं संवत्सरात्प्रागपि कर्तव्यम्' इति सोऽयमापत्कल्पः। यदा त्वापत्कल्पत्वेन प्राक्सपिण्डीकरणात् प्रेतश्राद्धानि करोति तदैकोद्दिष्टविधानेन कुर्यात्। यदा तु मुख्यकल्पेन स्वकाल एव करोति तदाब्दिकं श्राद्धं यो यथा करोति पार्वणमेकोद्दिष्टं वा तथा मासिकानि कुर्यात्। 'सपिण्डीकरणादर्वाक्कुर्वन् श्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥ सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि'॥ इति स्मरणात्। एतच्च प्रेतश्राद्धसहितं सपिण्डीकरणं संविभक्तधनेषु बहुषु भ्रातृषु सत्स्वप्येकेनैव कृतेनालं न सर्वैः कर्तव्यम्। 'नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि' ॥ इति स्मरणात्। इदं च प्रेतश्राद्धसहितं सपिण्डीकरणं असंन्यासिनां पुत्रादिभिर्नियमेन कर्तव्यं प्रेतत्वविमोक्षार्थत्वात्। संन्यासिनां तु न कर्तव्यम्। यथाहोशनाः—'एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते॥ सपिण्डीकरणं तेषां न कर्तव्यं सुतादिभिः। त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते' ॥ इति। पुत्रासंनिधाने येन सगोत्रादिना दाहसंस्कारः कृतस्तेनैवादशाहान्तं तत्प्रेतकर्म कर्तव्यम्। 'असगोत्रः सगोत्रो वा स्त्री दद्याद्यदि वा पुमान्। प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्'॥ इति स्मरणात्। शूद्राणामप्येतत्कर्तव्यममन्त्रकं द्वादशेऽह्नि। 'एवं सपिण्डीकरणं मन्त्रवर्ज्यं शूद्राणां द्वादशेऽह्नि' इति विष्णुस्मरणात्। सपिण्डीकरणादूर्ध्वं सांवत्सरिकपार्वणादीनि पुत्रस्य नियमेनैव कार्याणि। अन्येषामनियतानि॥ २५५ ॥

(वी०मि०) मासिकादिकालान् प्रदर्शयन्नेव मासिकादिश्राद्धान्याह—

मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् ॥
प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ २५६ ॥

मर(१)णवत्सरं व्याप्य प्रतिमासं मृताहनि मरणपक्षीयमरणतिथौ श्राद्धं कर्तव्यमिति प्रकरणादन्वीयते। तदेव च मासिकमित्युच्यते। तुशब्देन षाण्मासिकयोर्मृताहकर्तव्यत्वव्यवच्छेदः।

> एकाहेन तु षण्मासा यदा स्युरपि चात्रिभिः।
> न्यूनः संवत्सरश्चैव स्यातां षाण्मासिके तदा ॥

इति तत्र कालान्तरबोधनात्। द्वितीयतुशब्देन वत्सरोत्तरं प्रतिसंवत्सरं वर्षे वर्षे चकारेण मृताहनीत्यनुकर्षति। 'अत ऊर्ध्वं संवत्सरे संवत्स(२)रे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादिति कात्यायनोक्तेः। एवमुक्तैकोद्दिष्टरीत्या एतच्च त्रिष्वप्यन्वेति। आद्यं षोडशप्रेतश्राद्धानां प्रथमं श्राद्धं मरणादेकादशेऽहनि प्रकृताशौचव्यपगम इति यावत्। 'आशौचव्यपगम' इति विष्णुवचनात् ॥ २५६ ॥

(मिता०) एकोद्दिष्टकालानाह—

मृतेऽहनीति। मृतेऽहनि प्रतिमासं संवत्सरं यावदेकोद्दिष्टं कार्यम्। सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरमेकोद्दिष्टमेव कर्तव्यम्। आद्यं सर्वैकोद्दिष्टप्रकृतिभूतमेकोद्दिष्टमेकादशेऽहनि। मृतदिवसापरिज्ञाने तच्छ्रवणदिवस अमावास्यायां वा कार्यम्। 'अपरिज्ञाते मृतेऽहनि अमावास्यायां श्रवणदिवसे वा' इति स्मरणात्। अमावास्यायामिति गमनमाससम्बन्धिन्याममावास्यायाम्। 'प्रवासदिवसे देयं तन्मासेन्दुक्षयेऽपि वा' इति स्मरणात्। मृतेऽहनीत्यत्राहिताग्नेर्विशेषो जातूकर्ण्येनोक्तः—'ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृतेऽहन्येव तद्भवेत्। अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः' ॥ इति। तत्र त्रिपक्षादर्वाग्यत्प्रेतकर्म तद्दाहदिवसादारभ्याहिताग्नेः कार्यम्। त्रिपक्षादूर्ध्वं यच्छ्राद्धं तन्मरणदिवस एवेत्यर्थः। अनाहिताग्नेस्तु सर्वं मृताह एव। आद्यमेकादशेऽहनी(३)त्याशौचापगमोपलक्षणमिति केचित्। 'शुचिना कर्म कर्तव्यं' इति शुद्धेरङ्गत्वात्। अथाशौचापगम इति सामान्येन सर्वेषां वर्णानामुपक्रम्यैकोद्दिष्टस्य विष्णुना विहितत्वाच्च। तदयुक्तम्—'एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम्। चतुर्णामपि वर्णानां सूतकं च पृथक्पृथक्' ॥ इति पैठीनसिस्मरणविरोधात्। 'आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि। कर्तु-

(१) मरणवत्सरं—इत्यारभ्य मृताहनि—इत्यन्तं क० पुस्तके नास्ति।

(२) संवत्सरे—इत्यधिकं ख० पुस्तके। (३) हनीति स्याशौचोप क०।

स्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः' ॥ इति शङ्खवचनविरोधाच्च। सामान्योपक्रमं विष्णुवचनं दशाहाशौचविषयमपि घटते इति। 'प्रतिसंवत्सरं चैवम्' इति प्रतिसंवत्सरं मृतेऽहन्येकोद्दिष्टमुपदिष्टं योगीश्वरेण। तथा च स्मृत्यन्तरम्-'वर्षे वर्षे च कर्तव्या मातापित्रोस्तु सत्क्रिया। अदैवं भोजयेच्छ्राद्धं पिण्डमेकं च निर्वपेत्' ॥ इति। यमोऽप्याह—'सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतः। मातापित्रोः पृथक्का(१)र्यमेकोद्दिष्टं मृतेऽहनि' ॥ इति। व्यासस्तु पार्वणं प्रतिषेधति—'एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः। अकृतं तद्विजानीया(२)त्स भवेत्पितृघातकः' ॥ इति। जमदग्निस्तु पार्वणमाह-'आपाद्य च सपिण्डत्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनि' ॥ इति। शातातपोऽप्याह—'सपिण्डीकरणं कृत्वा कुर्यात्पार्वणवत्सदा। प्रतिसंवत्सरं विद्वांश्छागलेयोदितो विधिः' ॥ इत्येवं वचनविप्रतिपत्तौ दाक्षिणात्या ह्येवं व्यवस्थामाहुः—'औरसक्षेत्रजाभ्यां मातापित्रोः क्षयाहे पार्वणमेव कर्तव्यं दत्तकादिभिरेकोद्दिष्टम्' इति जातूकर्ण्यवचनात्, 'प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ। कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दश' ॥ इति, तदसत्। न ह्यत्र क्षयाहवचनमस्ति, अपि तु प्रत्यब्दमिति। सन्ति च क्षयाहव्यतिरिक्तानि प्रत्यब्दश्राद्धान्यक्षय्यतृतीयामाघीवैशाखीप्रभृतिषु, अतो न क्षयाहविषयपार्वणैकोद्दिष्टव्यवस्थापनयालम्। यत्तु पराशरवचनम्-'पितुर्गतस्य देवत्वमौरसस्य त्रिपौरुषम्। सर्वत्रानेकगोत्राणामेकस्यैव मृतेऽहनि' ॥ इति, तदपि न व्यवस्थापकम्। यस्मादस्यायमर्थः—देवत्वं गतस्य सपिण्डीकृतस्य पितुः सर्वत्रौरसेन त्रिपौरुषं पार्वणं कार्यम्। अनेकगोत्राणां भिन्नगोत्राणां मातुलादीनां क्षयेऽहनि यच्छ्राद्धं तदेकस्यैवैकोद्दिष्टमेवेति। किं च 'सपिण्डीकरणादूर्ध्वमप्येकोद्दिष्टमेव कर्तव्यमौरसेनापि' इत्युक्तं पैठीनसिना। 'एकोद्दिष्टं हि कर्तव्यमौरसेन मृतेऽहनि। सपिण्डीकरणादूर्ध्वं मातापित्रोर्न पार्वणम्' ॥ इति। उदीच्याः पुनरेवं व्यवस्थापयन्ति-अमावास्यायां भाद्रपदकृष्णपक्षे वा मृताहे पार्वणमन्यत्र मृताह एकोद्दिष्टमेवेति। 'अमावास्याक्षयो यस्य प्रेतपक्षेऽथवा पुनः। पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचन' ॥ इति स्मरणात्। तदपि नाद्रियन्ते वृद्धाः। अनि-

(१) पृथक्कुर्यात ख०। (२) जानीयाद्भवेत्च ख०।

श्चितमूलेनानेन वचनेन निश्चितमूलानां बहूनां क्षयाहमात्रपार्वणविषयाणां वचनानाममावास्याप्रेतपक्षमृताहविषयत्वेनातिसङ्कोच(१)स्यायुक्तत्वात्, सामान्यवचनानर्थक्याच्च। तत्र हि सामान्यवचनस्य विशेषवचनेनोपसंहारो यत्र सामान्यविशेषसम्बन्धज्ञानेन वचनद्वयमर्थवत्। यथा सप्तदशसामिधेनीरनुब्रूयादित्यनारभ्याधीतस्य विकृतिमात्रविषयस्य सप्तदशवा(२)क्यस्य सामिधेनीलक्षणद्वारसम्बन्धबोधेनार्थवता मित्रविन्दादिप्रकरणपठितेन साप्तदश्यवाक्येन मित्रविन्दाद्यधिकारापूर्वसम्बन्धबोधेनार्थवता मित्रविन्दादिप्रकरणे उपसंहारः। इह तु द्वयोर्मृताहमात्रविषयत्वान्नार्थवत्तेति। अतोऽत्र पाक्षिकैकोद्दिष्टनिवृत्तिफलकतया पार्वणनियमविधानं युक्तम्। नचैकोद्दिष्टवचनानां मातापितृक्षयाहाविषयत्वेन पार्वणवचनानां च तदन्यक्षयाहविषयत्वेन व्यवस्था युक्ता। उभयत्रापि मातापितृसुतग्रहणस्य विद्यमानत्वात्। 'सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः। मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनि' ॥ इति। तथा—'आपाद्य सहपिण्डत्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनि' ॥ इति। यदपि कैश्चिदुच्यते—मातापित्रोः क्षयाहे साग्निः पार्वणं कुर्यान्निरग्निरेकोद्दिष्टमिति। 'वर्षे वर्षे सुतः कुर्यात्पार्वणं योऽग्निमान्द्विजः। पित्रोरनग्निमान्धीर एकोद्दिष्टं मृतेऽहनि' ॥ इति सुमन्तुस्मरणादिति। तदपि सत्प्रतिपक्षत्वादुपेक्षणीयम्। 'वह्न्यग्नयस्तु ये विप्रा ये चैकाग्नय एव च। तेषां सपिण्डनादूर्ध्वमेकोद्दिष्टं न पार्वणम्' ॥ इति स्मरणात्। तत्रैव निर्णयः—संन्यासिनां क्षयाहे सुतेन पार्वणमेव कर्तव्यम्। 'एकोद्दिष्टं यतेर्नास्ति त्रिदण्डग्रहणादिह। सपिण्डीकरणाभावात्पार्वणं तस्य सर्वदा' ॥ इति प्रचेतःस्मरणात्। अमावास्याक्षयाहे प्रेतपक्षक्षयाहे च पार्वणमेव। 'अमावास्या क्षयो यस्य प्रेतपक्षेऽथवा पुनः' इत्यादिवचनस्योक्तरीत्या नियमपरत्वात्। अन्यत्र क्षयाहे पार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्प एव। तथापि वंशसमाचारव्यवस्थायां सत्यां व्यवस्थितो विकल्पोऽसत्यामैच्छिक इत्यलमतिप्रसङ्गेन ॥ २५६ ॥

---

(१) संकोचः स्यादित्युक्तत्वात् ग०।

(२) सप्तदशपदस्य क०।

(वी० मि०) श्राद्धीयपिण्डानां प्रति(१)पादकमाह—

पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा ॥
प्रक्षिपेत् सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत् ॥ २५७ ॥

गवेऽजाय छागाय विप्राय वा पिण्डान् दद्यात्, अग्नौ जले वा प्रक्षिपेत्। अपिशब्देन मध्यमं पिण्डं पत्नी प्राश्नाति पुत्रकामेत्याद्युक्तप्रतिपत्त्यन्तरपरिग्रहः। तुशब्देन श्राद्धीयान्नस्य पात्रसंभवे प्रतिपत्त्यन्तरं व्यवच्छिनत्ति। किं च श्राद्धिब्राह्मणेषु श्राद्धस्थले विद्यमानेषु द्विजोच्छिष्टं न मार्जयेत् नाऽपनयेत् ॥ २५७ ॥

(मिता०) नित्यश्राद्धव्यतिरिक्तसर्वश्राद्धशेषमिदमभिधीयते—

पिण्डानिति। पूर्वदत्तानां पिण्डानां पिण्डस्य वा प्रतिपत्तिरियम्। गवे अजाय ब्राह्मणाय वा तदर्थिने पिण्डान्दद्यात्। अग्नावगाधे जलेऽपि वा प्रक्षिपेत्। किंच सत्सु विप्रेषु भोजनदेशावस्थितेषु द्विजोच्छिष्टं न मार्जयेन्नोद्वासयेत् ॥ २५७ ॥

(वी० मि०) श्राद्धीयद्रव्यविशेषेण देशकालविशेषेण च तृप्तिकालमाह चतुर्भिः—

हविष्यान्नेन वै मासं पायसेन तु वत्सरम् ॥
मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥ २५८ ॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् ॥
मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः ॥ २५९ ॥

हविष्यं हविर्योग्यमन्नं तिलव्रीह्यादि, तेन दत्तेनेति वचनविपरिणामेनाऽन्वयः। एवमग्रेऽपि पितामहा मासं मासपर्यन्तं अभि सर्वतोभावेन तृप्यन्ति। पितामहपदेन पितॄणां सर्वेषां प्रतिपादनम्। तथा च मनुः—

तिलव्रीहियवैर्माषैर्मूलैरद्भिः फलेन(२)वा ।
दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणाम् ॥

वैशब्दः पादपूरणे। पायसेन परमान्नेन वत्सरमाभिव्याप्य पितामहा अभितृप्यन्तीति सर्वत्रान्वेति। तुशब्देन न्यूनं कालं व्यवच्छिनत्ति। मत्स्यादिभिरिह श्राद्धे दत्तैर्यथाक्रममुत्तरोत्तरं मासवृद्ध्या

(१) प्रतिपत्त्यादिकमाह—इति ख० पु० पाठः। (२) च—इति ख० पु० पाठः।

एकैकमासवृद्ध्या उपलक्षितं कालमभिव्याप्याऽभितृप्यन्ति, तेन मात्स्यैर्मत्स्यसम्बन्धिभिर्मांसैर्मासं तृप्यन्ति, हारिणैर्हरिणसम्बन्धिभिर्मांसैर्मासद्वयं तृप्यन्तीत्यादिक्रमेण बोध्यम्। औरभ्रं मेषसम्बन्धि, शाकुनं भक्ष्यपक्षिसम्बन्धि, छागं छागसम्बन्धि, पृषत् चित्रमृगस्तदीयं पार्षतं, एणः कृष्णमृगस्तदीयमैणं, रुरुर्मृगविशेषस्तत्सम्बन्धि रौरवं, वाराहमारण्यशूकरसम्बन्धि, शाशं शशसम्बन्धि॥२५८-२५९॥

(मिता०) भोज्यविशेषेण फलविशेषमाह—

हविष्यान्नेनेति। एणेत्यादि च। हविष्यं हविर्योग्यं तिलव्रीह्यादि। यथाह मनुः (३।२६७)—'तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफ(१)लेन वा। दत्तेन मासं तृप्य(२)न्ति विधिवत्पितरो नृणाम्' ॥ इति। तदन्नं हविष्यान्नं तेन मासं पितरस्तृप्यन्तीत्यना(३)गतेनान्वयः। पायसेन गव्यपयःसिद्धेन संवत्सरम्। 'संवत्सरं तु गव्येन पयसा पायसेन वा' इति (मनुः ३।२७१) स्मरणात्। मत्स्यो भक्ष्यः पाठीनादिस्तस्येदं मात्स्यम्। हरिणस्ताम्रमृगः। एणः कृष्णः। 'एणः कृष्णमृगो ज्ञेयस्ताम्रो हरिण उच्यते' इत्यायुर्वेदस्मरणात्। तस्येदं हारिणकम्। अविरुरभ्रस्तत्सम्बन्धि औरभ्रम्। श(४)कुनिस्तित्तिरिस्तत्सम्बन्धि शाकुनम्। छागोऽजस्तदीयं छागम्। पृषच्चित्रमृगस्तन्मांसं पार्षतम्। एणः कृष्णमृगस्तत्पिशितमैणम्। रुरुः शंबरस्तत्प्रभवं रौरवम्। वराह आरण्यसूकरस्तज्जं वाराहम्। शशस्येदं शाशम्। एभिर्मांसैः पितृभ्यो दत्तैर्हविष्यान्नेन वै मासमित्युक्तत्वात्तत ऊर्ध्वं यथाक्रममेकैकमासवृद्ध्या पितरस्तृप्यन्ति ॥ २५८-२५९ ॥

> खड्गामिषं महाशल्कं मधु मुन्यन्नमेव(५)च ॥
> लौहामिषं महाशाकं मांसं वार्ध्रीणसस्य(६)च ॥ २६० ॥
> यद्ददाति गयास्थश्च सर्वमानन्त्यमश्नुते ॥
> तथा वर्षात्रयोदश्यां मघासु च विशेषतः ॥ २६१ ॥

(वी० मि०) खड्गस्य गण्डकस्य आमिषं मांसं, महाशल्का रोहितादयो मत्स्यास्तत्सम्बन्धिमांसं महाशल्कं, 'महाशल्कः शल्यक'

(१) फलैस्तथा ग० । (२) मासं प्रीयन्ते ख० । (३) अनागतत्वेना० ग० ।
(४) शाकुनं भक्ष्यपक्षिसंबन्धि क० ख० । (५) वा-इतिमुद्रितपुस्तके पाठः ।
(६) वार्ध्रीणसस्य-इति क० ख० पु० पाठः ।

इति मेधातिथिः । मधु प्रसिद्धं, मुन्यन्नं नीवारादि, चकारान्मधुसंयुक्त-मदनीयमात्रम्—

यत्किंचिन्मधुसंयुक्तं तदानन्त्याय कल्पते ।

इति यमवचनात् । लोहो लोहितच्छागस्तस्यामिषं मांसं, महाशाकं कालशाकं शाकविशेषं लडिचो इति ख्यातं, वार्ध्रीणसस्य—

त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।
वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः पितृकर्मणि ॥
कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहङ्गमः ।
स वै वार्ध्रीणसः प्रोक्त इत्येषा नैगमी श्रुतिः ॥

इति निगमलक्षितस्य वृद्धच्छागस्य मांसं, चकारान्निगमलक्षित-स्यैव पक्षिविशेषस्य द्वितीयवार्ध्रीणसस्य मांसं,यद्ददाति तत्खड्गामिषा-दि सर्वं यत्किञ्चिद्गयास्थितो ददाति, वर्षात्रयोदश्यामपरपक्षत्रयोद-श्यां मघासु वा यद्द्रव्यं ददाति तत्सर्वं विशेषत उत्कर्षेणानन्त्यं कल्पव्यापिपितृतृप्तिहेतुत्वं अश्नुते व्याप्नोति । एवकारश्च खड्गमांसादेः परस्परानिरपेक्षफलहेतुत्वबोधनार्थः सर्वत्रान्वेति । गयास्थश्चेति चकारेण गयासमत्वेनोक्ते कृतशौचादौ तीर्थाऽवास्थितस्य परिग्रहः। तथापदेन—

आषाढ्यामथ कार्तिक्यां माघ्यां त्रीन् पञ्च वा द्विजान् ।
तर्पयेत्पितृपूर्वं तु तदस्याऽक्षयमुच्यते ॥

इति यमोक्तकालसमुच्चयः । मघास्विति बहुवचनं बहुतारकत्वा-भिप्रायेण व्यक्त्यभिप्रायेण वा । चकारेण—

राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम् ।

इति यमोक्तराहूपरागकालसङ्ग्रहः ॥ २६०-२६१ ॥

(मिता०) किंच—

खड्गामिषमिति । यद्ददातीति च । खड्गो गण्डकस्तस्य मांसम् । महाशल्को मत्स्यभेदः । मधु माक्षिकम् । मुन्यन्नं सर्वमारण्यं नीवारादि । लोहो रक्तश्छागस्तदामिषं लौहामिषम् । महाशाकं कालशाकम् । वार्ध्रीणसो वृद्धः श्वेतच्छागः । 'त्रिपिबं त्वि-न्द्रियक्षीणं वृद्धं श्वे(१)तमजापतिम् । वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः

(१) 'लडिवा' इति ख० पु० पा० । (२) श्वेतं वृद्धमजापतिं ख० ।

श्राद्धकर्मणि' ॥ इति याज्ञिकप्रसिद्धः । त्रिपिबः पिबतः कर्णौ जिह्वा च यस्य जलं स्पृशन्ति सः त्रिभिः पिबतीति त्रिपिबः तस्य वार्ध्रीणसस्य मांसम् । यद्ददाति गयास्थश्च यत्किञ्चिच्छाकादिकमपि गयास्थो ददाति । चशब्दाद्गङ्गाद्वारादिषु च—'गङ्गाद्वारे प्रयागे च नैमिषे पुष्करेऽर्बुदे । संनिहत्यां गयायां च श्राद्धमक्षय्यतां व्रजेत्' ॥ आनन्त्यमश्नुते इति आ(१)नन्त्यफलहेतुत्वं प्राप्नोति । आनन्त्यमश्नुत इति प्रत्येकमभिसंबध्यते । तथा वर्षात्रयोदश्यां भाद्रपदकृष्णत्रयोदश्यां विशेषतो मघायुक्तायां यत्किंचिद्दीयते तत्सर्वमानन्त्यमश्नुत इति गतेन सम्बन्धः । अत्र यद्यपि मुन्यन्नमांसमध्वादीनि सर्ववर्णानां सामान्येन श्राद्धे योग्यानि दर्शितानि तथापि पुलस्त्योक्ता व्यवस्थादरणीया । 'मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः । मधुप्रदानं शूद्रस्य सर्वेषां चाविरोधि यत्' ॥ इति । अस्यार्थः—मुन्यन्नं नीवारादि यच्छ्राद्धयोग्यमुक्तं तद्ब्राह्मणस्य प्रधानं समग्रफलदम् । यच्च मांसमुक्तं तत्क्षत्रियवैश्ययोः प्रधानम् । यत्क्षौद्रमुक्तं तच्छूद्रस्य । एतत्रितयव्यतिरिक्तं यदविरोधि यदप्रतिषिद्धं वास्तुकादि, यच्च विहितं हविष्यं कालशाकादि तत्सर्वेषां समग्रफलदमिति ॥ २६०–२६१ ॥

(वी० मि०) अथ तिथिषु काम्यश्राद्धानि फलानि चाहुः—

कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि ॥
द्यूतं कृषिं वणिज्यां च(२)द्विशफैकशफांस्तथा ॥ २६२ ॥
ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरूप्ये सकुप्यके ॥
ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥ २६३ ॥
प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ॥
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ॥ २६४ ॥

एकां चतुर्दशीं वर्जयित्वा सदा सर्वासु तिथिषु प्रत्येकं प्रतिपत्प्रभृतिषु श्राद्धदः श्राद्धकर्ता कन्यादीन् यथाक्रममाप्नोति । अत्राऽपरप(३)क्षीयास्तिथयो बोध्याः । 'अमावास्यां सर्वकाम' इति वचनात् । कन्या स्त्रीरूपमपत्यं, कन्यावेदिनो जामातरः, पशवोऽजादयः मुख्याः,

(१) आनन्त्यफलं ख० । (२) द्यूतं कृषिं च वाणिज्यं द्विशफैकशफं–इति क० पु० पाठः ।
(३) अत्र परपक्षीयास्तिथयः–इति ख० पु० पाठः ।

सुताः औरसाः पुत्राः 'पशून्वै सा सुतानपी'ति पाठे न्यायवर्तित्वं सत्पदार्थः, द्यूतं द्यूतजयः, कृषिवणिज्यापदे तत्कृतलाभातिशयपरे, द्विशफा गवादयः, एकशफा अश्वादयः। अत्र समासेपि प्रत्येकं तिथ्योरन्वयः। ब्रह्मवर्चसं वेदाध्ययनजनिततेजोविशेषस्तद्वन्तो ब्रह्मवर्चस्विनः पुत्राः, स्वर्णरूप्ये हेमरजते मिलिते, कुप्यं स्वर्णरजतभिन्नं त्रपुसीसकादि तत्सहिते सकुप्यके। अत्र कुत्र कुप्यस्य तिथ्यन्तेऽन्वयः, साहित्यं चाऽपरपक्षसम्बन्धमात्रेण। ज्ञातिश्रैष्ठ्यं स्ववंशोत्कृष्टत्वम्। सर्वे कामा अत्रोक्ताः कन्यादयस्त्रयोदश। अत्राऽपिशब्दतथाशब्दैर्बहुभिर्मुनिभिरुक्तानां बहुविधानां फलानां समुच्चयः। ते चात्र विस्तरभयान्न प्रदर्श्यन्ते। शस्त्रेण त्विति। शस्त्रपदं विषाद्युपलक्षकम्। तदाह मरीचिः—

विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम्।
चतुर्दश्यां भवेत्पूजा अन्येषां तु विगर्हिता॥

अत्र विषादिमृतत्वेन रोगव्यतिरेकमृतत्वमुपलक्ष्यते। गुर्वनुगमनाचारस्थल इव लाघवेनैकश्रुतिकल्पनात्। एवं च प्रसवमृतायाः कृतपत्यनुमरणायाश्च शस्त्रहतश्राद्धं सिध्यति। तत्र चतुर्दश्यां प्रदीयते श्राद्धे। अत्र तुशब्देनाऽशस्त्रहतानां व्यवच्छेदः। वैशब्दः पादपूरणे। इदं च शस्त्रहतश्राद्धमेकोद्दिष्टरूपम्।

तदेकोद्दिष्टविधिना कर्तव्यं शस्त्रघातिनाम्।

इति वचनात्। काम्यप्रकरणाम्नातस्याऽस्य फलं 'चतुर्दश्यां तु भूतिकामः' इति हारीतोक्तं द्रष्टव्यम्। अत एव 'अथ काम्यानी'त्युपक्रम्य कात्यायनेन 'शस्त्रहतस्य चतुर्दश्या'मित्युक्तम्। आश्विनापरपक्षचतुर्दश्यां श्राद्धं नित्यमपि।

आहवेषु विपन्नानां जलाग्निभृगुपातिनाम्।
चतुर्दश्यां भवेत्पूजाऽमावास्यायान्तु कामिकी॥

इति वचनात्॥ २६२-२६४॥

(मिता०) तिथिविशेषात्फलविशेषमाह—

कन्यामिति। ब्रह्मवर्चस्विन इति। प्रतिपत्प्रभृतिष्विति च। कन्यां रूपलक्षणशीलवतीम्। कन्यावेदिनो जामातरो बुद्धिरूपलक्षणसम्पन्नाः। पशवः क्षुद्रा अजादयः। सत्सुताः सन्मा(१)र्गवर्तिनः। द्यूतं

(१) सन्मार्गगाः ग०।

द्यूतविजयः। कृषिः कृषिफलम्। वणिज्या वाणिज्यलाभः। द्विशफा गवादयः। एकशफा अश्वादयः। ब्रह्मवर्चस्विनः पुत्राः, वेदाध्ययनतदर्थानुष्ठानजनितं तेजो ब्रह्मवर्चसं तद्वन्तः। स्वर्णरूप्ये हेमरजते। तद्यतिरिक्तं त्रपुसीसकादि कुप्यकम्। ज्ञातिश्रैष्ठ्यं ज्ञातिषूत्कृष्टत्वम्। सर्वकामाः काम्यन्त इति कामाः स्वर्गपुत्रपश्वादयः। एतानि कन्यादीनि चतुर्दशफलानि कृष्णपक्षप्रतिपत्प्रभृतिष्वमावास्यापर्यन्तासु चतुर्दशीवर्जितासु चतुर्दशसु तिथिषु श्राद्धदो यथाक्रममाप्नोति। ये केचन शस्त्रहतास्तेभ्यः कृष्णचतुर्दश्यामेकोद्दिष्टविधिना श्राद्धं दद्याद्यदि ब्राह्मणादिहता न भवन्ति। 'समत्वमागतस्यापि पितुः शस्त्रहतस्य वै। एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालयः'॥ इति स्मरणात्। समत्वमागतस्य सपिण्डीकृतस्य महालये भाद्रपदकृष्णचतुर्दश्यां शस्त्रहतस्यैव श्राद्धं नान्यस्येति नियम्यते न पुनः शस्त्रहतस्य चतुर्दश्यामेवेति। अतश्च क्षयाहादौ शस्त्रहतस्यापि यथाप्राप्तमेव श्राद्धम्। न च भाद्रपदकृष्णपक्ष एवायं श्राद्धविधिरिति मन्तव्यम्। 'प्रौष्ठपद्यामपरपक्षे मासि मासि चैवम्' इति शौनकस्मरणात्॥२६२-२६४॥

(वी० मि०) कृत्तिकादिश्राद्धानि काम्यान्याह—

स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा॥
पुत्रान् ज्यैष्ठ्यं ससौभाग्यं(१)समृद्धिं मुख्यतां शुभम्॥२६५॥
प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीन(२)पि॥
अरोगित्वं यशो वीतशोकतां परमां गतिम्॥ २६६॥
धनं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजाविकम्॥
अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति॥ २६७॥
कृत्तिकादिभरण्यन्तं स कामानाप्नुयादिमान्॥
आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः॥ २६८॥

आस्तिकः स्वीकृतवेदप्रामाण्यः, श्रद्धधानः वैदिके कर्मणि फलावश्यंभावानिश्चयवान्, मदो गर्वो मत्सर ईर्ष्यारूपः तौ व्यपेतौ यतः

(१) पुत्रान् श्रैष्ठ्यं च सौभाग्यं-इति ख० पुस्तके, पुत्रं श्रैष्ठ्यं च सौभाग्यं-इति मुद्रितपुस्तके पाठौ।   (२) वाणिज्यप्रभृतींस्तथा-इति ख० पु० पाठः।

स व्यपेतमदमत्सरः, चकारेण शुचित्वसमुच्चयः। एवंभूतो यः कृत्तिकादिभरण्यन्तं श्राद्धं विधिवत् शास्त्रोक्तविधियुक्तं सम्यक् विशिष्टपात्रादिप्रतिपादनविशिष्टं प्रयच्छति ददाति करोतीति यावत्। स इमान्कामानाप्नुयात्। इमान् कानित्याकाङ्क्षायां स्वर्गमित्यादि। ओजस्तेजो, बलं सामर्थ्यं, शौर्यं निर्भयत्वं, श्रैष्ठ्यं ज्ञातिपूत्कृष्टत्वं, सौभाग्यं जनप्रियत्वं, समृद्धिर्धनाद्युपचयः, मुख्यता गणेषु प्रधानत्वं, शुभं कल्याणं, प्रवृत्तचक्रताऽप्रतिहताज्ञता, वाणिज्यप्रभृतयो वाणिज्यादिकृष्यादिफलानि, परमा गतिर्ब्रह्मलोकावाप्तिः, वेदाः सकलवेदज्ञानं, भिषक्सिद्धिः औषधफलावाप्तिः, अजाविकमिति प्रत्येकं द्वयोर्नक्षत्रयोरन्वेति। अजा छागः, अविर्मेषः स्वार्थे कः। आयुर्दीर्घजीवित्वं, अन्यत्प्रसिद्धम्। हिशब्दः छन्दोरक्षणार्थः। तथाशब्दाश्चकाराश्च पूर्ववद्व्यन्तरोक्तफलसमुच्चयार्थाः। एवकारो भिन्नक्रमो नास्तिकादेः कर्तृव्यवच्छेदाय ॥ २६५-२६८ ॥

(मिता०) नक्षत्रविशेषात्फलविशेषमाह—

स्वर्गमिति। प्रवृत्तचक्रतामिति। धनमिति। कृत्तिकादिभरण्यन्तमिति च। कृत्तिकामादिं कृत्वा भरण्यन्तं प्रतिनक्षत्रं यः श्राद्धं ददाति स यथाक्रमं स्वर्गादीनायुःपर्यन्तान्कामानवाप्नोति, यद्यास्तिकः (१)श्रद्दधानो व्यपेतमदमत्सरश्च भवति। आस्तिको विश्वासवान्। श्रद्दधान आदरातिशययुक्तः। व्यपेतमदमत्सरः मदो गर्वः मत्सर ईर्ष्या ताभ्यां रहितः। (२)स्वर्गं निरतिशयसुखम्। अपत्यमविशेषेण। ओज आत्मशक्त्यतिशयः। शौर्यं निर्भयत्वम्। क्षेत्रं फलवत्। बलं शारीरम्। पुत्रो गुणवान्। श्रैष्ठ्यं ज्ञातिषु। सौभाग्यं जनप्रियता। समृद्धिर्धनादेः। मुख्यता अग्र्यता। शुभं सामान्येन। प्रवृत्तचक्रता अप्रतिहताज्ञता। वाणिज्यप्रभृतयो वाणिज्यकुसीदकृषिगोरक्षाः। अरोगित्वं अ(३)नामययोगित्वम्। यशः प्रख्यातिः। वीतशोकता इष्टवियोगादिजनितदुःखाभावः। परमा गतिर्ब्रह्मलोकप्राप्तिः। धनं सुवर्णादि। वेदा ऋग्वेदादयः। भिषक्सिद्धिरौषधफलावाप्तिः। कुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि। गावः प्रसिद्धाः। अजाश्च अवयश्च अश्वाश्च। आयुर्दीर्घजीवनम् ॥२६५-२६८॥

---

(१) श्रद्दधानश्चेत् ख०। (२) स्वर्गोऽतिशयसुखं क०। (३) अनामयित्वं ग०।

(वी० मि०) अत्र पित्रादयो वस्वादिरूपेण ध्येया इति श्राद्धेतिकर्तव्यतामभिप्रेत्य तत्फलमाह—

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ॥
प्रीणयन्ति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः ॥ २६९ ॥
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥
प्रयच्छन्ति तथा राज्यं प्रीता नृणां (१)पितामहाः ॥२७०॥

अदितिसुता आदित्याः वस्वादित्रयः श्राद्धदेवताः पितरो ध्यानवशात् स्वपित्रादिरूपत्वेन कल्पिताः सन्तः तावन्मात्रेण तर्पिताः प्रीणिता मनुष्याणां श्राद्धकर्तॄणां पितॄन् श्राद्धेन यजमानकृतेनैव रक्षोनिवारणादिभिः स्वव्यापारैरनुगृहीतेन प्रीणयन्ति । तथा वस्वादिप्रीतिप्रकारेण जातप्रीतयश्च नृणां श्राद्धकर्तॄणां पितामहाः पित्रादयः आयुःप्रभृतीनि फलानि श्राद्धकर्तृभ्यः प्रयच्छान्ति प्राजापत्यम् । चकारात् स्मृत्यन्तरोक्तानां श्राद्धफलानां समुच्चयः ॥ २६९ ॥ २७० ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने श्राद्धप्रकरणम् ।

(मिता०) 'मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः' इत्यनेन पितॄणां श्राद्धेन तृप्तिर्भवतीत्युक्तं तदनुपपन्नम्, प्रातिस्विकशुभाशु(१)भकर्मवशेन स्वर्गनरकादिगतानां मनुष्याणां पुत्रादिभिर्दत्तैरन्नपानादिभिस्तृप्त्यसंभवात् । संभवेऽपि स्वयमात्मनाऽप्यनीशाः कथं स्वर्गादिफलं प्रयच्छन्तीत्यत आह—

वसुरुद्रादितसुता इति । आयुरिति च । न ह्यत्र देवदत्तादय एव श्राद्धकर्मणि संप्रदानभूताः पित्रादिशब्दैरुच्यन्ते किं त्वधिष्ठातृवस्वादिदेवतासहिता एव । यथा देवदत्तादिशब्दैर्न शरीरमात्रं नाप्यात्ममात्रं किंतु शरीरविशिष्टा आत्मान उच्यन्ते । एवमधिष्ठातृदेवतासहिता एव देवदत्तादयः पित्रादिशब्दैरुच्यन्ते । अतश्चाऽधिष्ठातृदेवता वस्वादयः पुत्रादिभिर्दत्तेनाऽन्नपानादिना तृप्ताः सन्तस्तानपि देवदत्तादींस्तर्पयन्ति कर्तॄंश्च पुत्रादीन्फलेन संयोजयन्ति । यथा माता ग(२)-

---

(१) प्रयच्छन्ति यथा राज्यं नृणां पितृपितामहाः—इति क. पु. पाठः ।
(२) गर्भधारणपोषणाय ग. ।

र्भपोषणायाऽन्यदत्तेन दोहदान्नपानादिना स्वयमुपभुक्तेन तृप्ता सती स्वजठरगतमप्यपत्यं तर्पयति दोहनान्नादिप्रदायिनश्च प्रत्युपकारफलेन संयोजयति तद्वद्वसवो रुद्रा अदितिसुताः आदित्या एव ते पितरः पितृपितामहप्रपितामहशब्दवाच्याः न केवलं देवदत्तादय एव श्राद्धदेवताः श्राद्धकर्मणि संप्रदानभूताः । किं तु मनुष्याणां पितॄन्देवदत्तादीन् स्वयं श्राद्धेन तर्पितास्तर्पयन्ति ज्ञानशक्त्यतिशययोगेन । किं च न केवलं पितॄंस्तर्पयन्ति, अपि तु श्राद्धकारिभ्य आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि राज्यं च । चकारात्तत्र तत्र शास्त्रोक्तमन्यदपि फलं स्वयं प्रीताः पितामहा वस्वादयः प्रयच्छन्तीति ॥ २६९-२७० ॥

इति श्राद्धप्रकरणम् ।

(वी० मि०) विघ्नोपशमद्वारा सफलमहादानादिरूपधर्माङ्गभूतां विनायकस्य ग्रहादीनां च पूजामभिधास्यन् प्रकृतौपयिकविघ्नज्ञानहेतूनुपदर्शयन्नेव विनायकस्य विघ्नमूलकत्वेन विनायकाप्रीतेर्विघ्नहेतुत्वमाह—

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः ॥
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा त(१)था ॥ २७१ ॥
तेनोपसृष्टो यस्तस्य लक्षणा(२)नि निबोधत ॥
स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ॥ २७२ ॥
काषायवाससश्चैव क्रव्यादांश्चाऽधिरोहति ॥
अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्राऽवतिष्ठते ॥ २७३ ॥
व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः ॥
विमना विफलारम्भः संसीदत्यनिमित्ततः ॥ २७४ ॥
तेनोपसृष्टो लभते न राज्यं राजनन्दनः ॥
कुमारी न च भर्तारं नाऽपत्यं गर्भमङ्गना ॥ २७५ ॥

---

(१) पुरा- इति ख. पु. पाठः ।
(२) लक्षणं विनिबोधत- इति क. पु. पाठः ।

आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ॥
वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः ॥ २७६ ॥

कर्मणामभीष्टानां लौकिकवैदिकरूपाणां विघ्नस्वरूपस्य फलस्य या निष्पत्तिस्तत्सिद्ध्यर्थं गणानां पुष्पदन्तप्रभृतीनामाधिपत्ये च पुरा पूर्वकल्पे ब्रह्मणा रुद्रेण चकाराद्विष्णुना च कर्मानुसारेण प्राणिनामिष्टानिष्टफलदानाय प्रवृत्त्यैव। विनायको हेरम्बः। विशेषणादरातिशयेन विनायकग्रहाद्यपूजकानामनिष्टं तत्पूजकानां चेष्टं कुर्वित्येवंरूपेण च नियोजितः आज्ञप्तः। तेन विनायकेनाप्रीतेन उपसृष्ट आस्कन्दितो यस्तस्य लक्षणानि हे मुनयः। निबोधत जानीध्वम्। लक्षणान्येवाह स्वप्न इत्यादि। विनायकोपसृष्टः स्वप्ने निद्रादशानां जलमत्यर्थमतिशयेनाऽवगाहते जले मज्जति। प्रवाहेण ह्रियते। स्वाप्निकानि सर्वाणि बुद्धिसिद्धान्यवगन्तव्यानि। मुण्डितशिरसः। काषयवाससो वृक्षत्वगादिरक्तवस्त्रांश्च पश्यति। क्रव्यादान् आममांसाशिनो गृध्रादीन् व्याघ्रादीन् वाऽधिरोहति आरोहति। अन्त्यजैश्चाण्डालैर्गर्दभैरुष्ट्रैर्वा सहैकस्मिन् स्थानेऽवतिष्ठते तैरवष्टब्धस्तिष्ठति। स्वाप्निकानि लक्षणान्यभिधाय जाग्रद्दशापन्नान्याह व्रजन्नित्यादि। वस्तुगत्यापि व्रजन् आत्मानं परैरनुगतं क्रियमाणपश्चाद्गमनं मन्यते भ्रान्त्या विषयीकरोति। केचित्तु इदमपि स्वाप्निकमेव वर्णयन्ति। परैः शत्रुभिर्यावद्भिरनुगतमभिभूयमानं मन्यत इति च ग्रन्थं व्याचक्षते। विमना विक्षिप्तचित्तः, विफल आरंभ उद्योगः प्रायेण यस्य, निमित्ततः कारणं विनैव संसीदति दैन्यमाप्नोति। चकारैर्बहूनां तैलाभ्यङ्गादीनां तत्र तत्राऽभिहितानां लक्षणानां सङ्ग्रहः। एवं लिङ्गान्युक्त्वा कर्मविघ्नांस्तत्प्रयुक्तानाह तेनोपसृष्टो लभते इत्यादि। तेनोपसृष्ट इति व्याख्यातम्। राजनन्दनः राज्ञः पुत्रो राज्यप्राप्त्यर्होऽपि राज्यं न लभते। न लभत इत्यध्ययनान्ते सर्वत्राऽन्वेति। कुमारी गर्भिणीत्यत्र उपसृष्टेति लिङ्गविपरिणामेनाऽन्वयः। श्रोत्रियश्चोक्तः। आचार्यत्वं उपनीयाध्यापकत्वजन्यसंस्कारविशेषरूपः। शेषं स्पष्टम्। चकारास्त्वौसर्गिकाभीष्टलाभकाले तत्तदभीष्टानामलाभ,मनिष्टनिवारणोपायेऽप्यनिष्टलाभं च समुच्चिन्वन्ति ॥ २७१-२७६ ॥

(मिता) दृष्टादृष्टफलसाधनानि कर्माण्यभिहितान्यप्यभिधास्यन्ते-

च । तेषां स्वरूपनिष्पत्तिः फलसाधनत्वं चाऽविघ्नेन भवतीत्यविघ्नार्थं कर्म विधास्यन् विघ्नस्य कारकज्ञापकहेतूनाह—

विनायक इति । विनायकः कर्मविघ्नसिद्ध्यर्थमित्यादिना । उभयविधहेतुपरिज्ञानाद्विघ्नस्य प्रागभावपरिपालनायोपस्थितस्य प्रध्वंसाय वा प्रेक्षापूर्वकारिणः प्रवर्तन्ते, रोगस्येवोभयविधहेतुपरिज्ञानात् । विनायको विघ्नेश्वरः पुरुषार्थसाधनानां कर्मणां विघ्नसिद्ध्यर्थं स्वरूपफलसाधनत्वाव(१)घातसिद्धये विनियोजितः नियुक्तः रुद्रेण ब्रह्मणा चकाराद्विष्णुना च । गणानां पुष्पदन्तप्रभृतीनामाधिपत्ये स्वाम्ये ॥२७१॥

(मिता०) एवं विघ्नस्य कारकहेतुमुक्त्वा ज्ञापकहेतुप्रदर्शनार्थमाह—

तेनेत्यादि । तेन विनायकेनोपसृष्टो गृहीतो यस्तस्य लक्षणानि ज्ञापकानि निबोधत जानीध्वं हे मुनयः । पुनर्मुनीनां प्रत्यवमर्शः शान्तिप्रकरणप्रारम्भार्थः । स्वप्ने स्वप्नावस्थायां जलमत्यर्थमवगाहते स्रोतसा ह्रियते निमज्जति वा । मुण्डितशिरसः पुरुषान्पश्यति । काषायवाससो रक्तनीलादिवस्त्रप्रावरणांश्च । क्रव्यादान् आममांसाशिनः पक्षिणः गृध्रादीन्मृगांश्च व्याघ्रादीनधिरोहति । तथाऽन्त्यजैश्चण्डालादिभिः गर्दभैः खरैरुष्ट्रैः क्रमेलकैः सह परिवृतस्तिष्ठति । व्रजन्गच्छन्नात्मानं परैः शत्रुभिः पृष्ठतो धावद्भिरनुगतमभिभूयमानं म(२)न्यते ॥ २७२–२७३ ॥

(मिता०) एवं स्वप्नदर्शनान्युक्त्वा प्रत्यक्षलिङ्गान्याह—

विमना इत्यादि । विमना विक्षिप्तचित्तः । विफलारम्भः विफला आरम्भा यस्य स तथोक्तः, न क्वचित्फलमाप्नोति । संसीदत्यनिमित्ततः विना कारणेन दीनमनस्को भवति । राजनन्दनो राजकुले जातः श्रुतशौर्यधैर्यादिगुणयुक्तोऽपि राज्यं न लभते । कुमारी रूपलक्षणाभिजनादिसम्पन्नापीप्सितं भर्तारम् । अङ्गना गर्भिण्यपत्यम् । ऋतुमती गर्भम् । अध्ययनतदर्थज्ञाने सत्यपि आचार्यत्वं श्रोत्रियः । विनयाचारादियुक्तोऽपि शिष्योऽध्ययनं श्रवणं वा । न लभत इति सर्वत्र सम्बध्यते । वणिक् वाणिज्योपजीवी तत्र कुशलोऽपि धान्यादिक्रयविक्रयादिषु लाभम् । कृषीवलः कर्षकस्तत्राभियुक्तोऽपि कृषिफलं नाप्नोति । एवं

(१) विधानसिद्धये क० । (२) अनुमन्यते ग० ।

यो यया वृत्त्या जीवति स तत्र निष्फलारम्भश्चेत्तेनोपसृष्टो वेदितव्यः ॥ २७४–२७६ ॥

(वी० मि०) अथ विघ्नोपशमहेतुशान्तिमाह सम्पूर्णेन प्रकरणेन। तत्रादौ विनायकोपसृष्टस्य स्नपनमाह—

स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकम् ॥
गौरसर्षपकल्केन साज्येनोत्सादितस्य च ॥
सर्वौषधैः सर्वगन्धैर्विलिप्तशिरसस्तथा ॥
भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः ॥ २७८ ॥
अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ॥
मृत्तिकां रोचनां गन्धान् गुग्गुलं चाऽप्सु निक्षिपेत् ॥२७९॥
या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥
चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः ॥ २८० ॥
सहस्राक्षं शतधारमृषिभिः पावनीकृतम् ॥
तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते ॥ २८१ ॥
भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ॥
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ २८२ ॥
यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ॥
ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा ॥ २८३ ॥

तस्य विनायकोपसृष्टस्य। पुण्ये चन्द्रताराकाद्यनुकूलेऽह्नि दिवसे। विधिपूर्वकं शास्त्रोक्तविधिपुरस्सरं स्नपनं कर्तव्यम् । विधिमेवाह-साज्येन घृतालोलितेन श्वेतसर्षपस्य कल्केन चूर्णेन उत्सादितस्य उद्वर्तितस्य ।

सुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
शाटीचम्पकमुस्तं च सर्वौषधिगणः स्मृतः ॥

इति परिभाषिते—

व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः ।
यवाश्चौषधयः सप्त विपदो घ्नन्ति धारिताः ॥

इति परिभाषितैर्वा सर्वौषधैः,

कस्तूरिकाया द्वौ भागौ चत्वारः कुङ्कुमस्य च।
षोडशश्चन्दनस्यैकः कर्पूरस्य चतुष्टयम्॥
सर्वगन्ध इति प्रोक्तः समस्तसुरवल्लभः।

इति पारिभाषितैश्च सर्वगन्धैर्विलिप्तशिरसः।'कुङ्कुमागुरुकर्पूरजातिफलरूपः सर्वगन्ध' इति कल्पतरुः। भद्रासनं शुचि स्वनुलिप्तस्थण्डिलोपरि रचितपञ्चवर्णस्वस्तिके देशे आस्तीर्णवक्ष्यमाणचर्मणि स्थितं काश्मरीनिर्मितं वस्त्राच्छादितमासनं, तत्रोपविष्टस्य सतः द्विजास्त्रयः शुभाः सौम्यमूर्तयः श्रुताध्ययनवृत्तसम्पन्नाः 'स्वस्ति भवन्तो ब्रुवन्त्वि'ति वाच्याः। गुरुणा गृह्योक्तक्रमेण पुण्याहवाचनं कुर्यादिति पर्यवसितार्थः। 'चत्वारः स्वस्तिवाच्या' इति मिताक्षरा। तत्र भद्रासनोपवेशनपूर्वकृत्यं श्लोकद्वयेनाह—अश्वस्थानादिति। अश्वस्थानादिभ्यः पञ्चभ्य आहृतां मृत्तिकां, पञ्चविधां रोचनां, गन्धान् चन्दनागुरुप्रभृतीन्, गुग्गुलम्, एकवर्णैरेकजातीयवर्णैश्चतुर्भिः कलशैर्ह्रदादाहृता या आपस्तास्वप्सु कलशस्थाने च निक्षिपेत्। ह्रदोऽशोष्यो जलाशयविशेषः। चकारात्तादृशान् कलशान् चूतादिपल्लवोपेतान् नानास्रग्दामवेष्टितकण्ठान् चन्दनचर्चितान् नववस्त्राच्छादितान् पूर्वादिषु चतसृषु दिक्षु स्थापयेदिति स्मृत्यन्तरसिद्धस्य समुच्चयः। तत उक्तरूपे देशे स्थापितं यद्रक्तं लोहितमानडुहं प्राग्ग्रीवमुत्तरलोम चर्म तस्मिन्नास्तृते भद्रं मनोरममासनं श्रीपर्णीनिर्मितं स्थाप्यम्। अस्मिन्नेव भद्रासने उपविष्टस्य सतः स्वस्तिवाच्याः। तथा (१)पतिपुत्रवतीभिः कृतमङ्गलं भद्रासनोपविष्टं पूर्वदिगादिस्थैश्चतुर्भिः कलशैः सहस्राक्षमित्यादिश्लोकत्रयात्मकमन्त्रेण प्रतिकलशमावृत्तेन गुरुः स्नापयेत्। एवं च कर्मपूर्वं गुरोर्वरणमप्यायाति। अत एवाभिषिञ्चामीति मन्त्रलिङ्गसङ्गतिः। केचित्तु एकैकश्लोकात्मकैस्त्रिभिर्मन्त्रैः कलशत्रयेण प्रत्येकं स्नपनं मिलितश्लोकमन्त्रेण, चतुर्थकलशेन स्नानं सर्वैर्मन्त्रैश्चतुर्थमिति स्मृत्यन्तरादित्याहुः।

मन्त्रार्थस्तु सहस्राक्षं सहस्रशक्तिकं शतधारमनेकप्रवाहं यदुदकमृषिभिर्मन्वादिभिः पावनं पावित्र्यकरं कृतमुत्पादितं तेनोदकेन त्वां विनायकोपसृष्टमुपसर्गशान्त्यर्थमभिषिञ्चामि। पावमान्यश्चैता आ-

(१) ततः—इति ख० पु० पाठः।

पः ते त्वां पुनन्तु इति । भगं ते कल्याणं वरुणो राजा सूर्यो बृहस्पतिश्च भगं, इन्द्रो वायुश्च भगं, सप्तर्षयश्च भगं दद्युरिति । केशेषु, सीमन्ते, मूर्द्धनि ललाटे, कर्णयोरक्ष्णोर्यत्ते दौर्भाग्यमकल्याणं तदापो देवताः सदाघ्नन्तु शमयन्तु ॥ २७७-२८३ ॥

(मिता०) एवं कारकज्ञापकहेतूनभिधाय विघ्नोपशान्त्यर्थं कर्मविधानमाह—

स्नपनमिति । तस्य विनायकोपसृष्टस्याऽनागतविनायकोपसर्गपरिहारार्थिनो वा स्नपनमाभिषेचनं कर्तव्यम् । पुण्ये स्वानुकूलनक्षत्रादियुक्ते । अह्नि दिवसे न रात्रौ । विधिपूर्वकं शास्त्रोक्तेतिकर्तव्यतासहितम् ॥

(मिता०) स्नपनविधिमाह—

गौरसर्षपेत्यादि । गौरसर्षपकल्केन सिद्धार्थपिष्टेन साज्येन घृत(१)लोलीकृतेनोत्सादितस्योद्वर्तिताङ्गस्य तथा सर्वौषधैः प्रियङ्गुनागकेसरादिभिः सर्वगन्धैश्चन्दनागुरुककस्तूरिकादिभिर्विलिप्तशिरसो वक्ष्यमाणभद्रासनोपविष्टस्य पुरुषस्य द्विजा ब्राह्मणाः शुभाः श्रुताध्ययनवृत्तसम्पन्नाः शोभनाकृतयश्चत्वारोऽस्य स्वस्ति भवन्तो ब्रुवन्त्विति वाच्याः । अस्मिन्समये गृह्योक्तमार्गेण पुण्याहवाचनं कुर्यादित्यर्थः ॥ २७७-२७८ ॥

(मिता०) किञ्च—

अश्वस्थानादिति । या इति च । अश्वस्थानगजस्थानवल्मीकसरित्सङ्गमाशोष्यह्रदेभ्य आहृतां पञ्चविधां मृदं गोरोचनं गन्धान् चन्दनकुङ्कुमागुरुप्रभृतीन् गुग्गुलं च तास्वप्सु विनिक्षिपेत् । या आप आहृता एकवर्णैः समानवर्णैश्चतुर्भिः कु(२)म्भैरव्रणास्फुटितकालकैः ह्रदादशोष्यात् सङ्गमाद्वा । ततश्चानडुहे चर्मणि रक्ते लोहितवर्णे उत्तरलोमनि प्राचीनग्रीवे भद्रं मनोरममासनं श्रीपर्णीनिमित्तं स्थाप्यम् । तत उक्तोदकमृत्तिकागन्धादिसहितांश्चूतादिपल्लवो(३)पशोभिताननान् स्रग्दामवेष्टितकण्ठांश्चन्दनचर्चि(४)ताननवाहनवस्त्रविभूषितांश्चतसृषु पूर्वादिदिक्षु स्थापयित्वा शुचौ सुलिप्ते स्थण्डिले रचितपञ्चव-

(१) घृतमिश्रेण ।
(२) कुम्भैः शुभैरव्रणा० ख० ।
(३) शोभितान् नान.सृग्दाम ख० ।
(४) ताननाहत ग० ।

र्णस्वस्तिके लोहितमानडुहं चर्मोत्तरलोम प्राचीनग्रीवमास्तीर्य तस्यो- परि श्वेतवस्त्रप्रच्छादितमासनं स्थापयेदित्येतद्भद्रासनम्। तस्मि- न्नुपविष्टस्य स्वस्तिवाच्याः द्विजाः॥ २७९-२८०॥

(मिता०) किञ्च—

सहस्राक्षमिति। स्वस्तिवाचनानन्तरं जीवत्पतिपुत्राभिः रूपगु- शालिनीभिः सुवेषाभिः कृतमङ्गलं पूर्वदिग्देशावस्थितं कलशमादा- यानेन मन्त्रेणाऽभिषिञ्चेद्गुरुः। सहस्राक्षमनेकशक्तिकं शतधारं बहुप्रवा- हमृषिभिर्मन्वादिभिर्यदुदकं पावनं पवित्रं कृतं उत्पादितं तेनोदकेन त्वां विनायकोपसृष्टं विनायकोपसर्गशान्तये अभिषिञ्चामि। पावमा- न्यश्चैता आपस्त्वां पुनन्तु॥ २८१॥

(मिता०) भगं ते इति। तदनन्तरं दक्षिणदेशावस्थितं द्वितीयं कलशमादायानेन मन्त्रेणाभिषिञ्चेत्। भगं कल्याणं ते तुभ्यं वरुणो राजा भगं सूर्यो भगं बृहस्पतिः भगमिन्द्रश्च वायुश्च भगं सप्तर्षयश्च ददुरिति॥ २८२॥

(मिता०) यत्ते इति। ततस्तृतीयं कलशमादायानेन मन्त्रेणा- ऽभिषिञ्चेत्। ते तव केशेषु यद्दौर्भाग्यमकल्याणं सीमन्ते मूर्धनि च ललाटे कर्णयोरक्ष्णोश्च तत्सर्वमापोदेव्यो घ्नन्तु उपशमयन्तु सर्वदेति२८३

(*वी० मि०*) *स्नानोत्तरकृत्यमाह—*

स्नातस्य सार्षपं तैलं स्रुवेणौदुम्बरेण तु॥
जुहुयान्मूर्धनि कुशान् सव्येन परिगृह्य तु॥ २८४॥
मितश्च संमितश्चैव तथा शालकटङ्कटौ॥
कूष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः॥ २८५॥

उक्तप्रकारेण स्नातस्य विनायकोपसृष्टस्य मूर्धनि सव्येन पाणि- ना कुशान् परिगृह्य अन्तर्धायकान् विधाय सार्षपं तैलं मितः संमितः शालः कटङ्कटः कूष्माण्डो राजपुत्र इत्येतैः षड्भिर्विनायकनामभिः रन्ते स्वाहाकारसमन्वितैः चकाराभ्यामोङ्काराद्यैश्चतुर्थ्यन्तैस्तथा शा- स्त्रोक्तविधिना जुहुयात्। एवकार इतिकारेणाऽन्वितस्तेन इतिनाम- भिरेव न तु विनायकनाम्नान्ते व्यवच्छिद्यते। पूर्वश्लोकस्य चका- राभ्यां तैलं च मूर्द्धनि चेति योजिताभ्यां मूर्धाधिकरणकतैलहोमा-

नन्तरं षड्भिर्नामभिर्लौकिकाग्निपक्वस्थालीपाकहोमो लौकिकाग्नौ स्मृत्यन्तरेण बोधितः समुच्चीयते । मितश्चेति चकारेण प्रत्येकं षण्णां नाम्नां मन्त्रत्वमुक्तम् ॥ २८४-२८५ ॥

(वी० मि०) ततः—

नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः ॥
दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः ॥ २८६ ॥
कृताकृतांस्तण्डुलांश्च पललौदनमेव च ॥
मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु ॥ २८७ ॥
पुष्पं चित्रं सुगन्धं च सुरां च त्रिविधामपि ॥
मूलकं पूरिकापूपांस्तथैवोण्डेरि(१)कास्रजः ॥ २८८ ॥
दध्यन्नं पायसं चैव गुडपिष्टं समोदकम् ॥
एतान्सर्वानुपा(२)हृत्य भूमौ कृत्वा ततः शिरः ॥ २८९ ॥
विनायकस्य जननीमुपतिष्ठेत्ततोऽम्बिकाम् ॥
दूर्वासर्षपपुष्पाणां दत्त्वाऽर्घ्यं पूर्णमञ्जलिम् ॥ २९० ॥
रूपं देहि यशो देहि भगं भगवति(३)देहि मे ॥
पुत्रान्देहि ध(४)नं देहि सर्वान्कामांश्च(५)देहि मे ॥२९१॥

इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तरूपैर्नामभिर्बलिमन्त्रभूतैर्नमोन्तैश्च चकारादोङ्कारादिचतुर्थ्यन्तैर्दद्यात् । हुतशेषं स्थालीपाकरूपबलिमिन्द्रादिभ्य इत्यर्थात् । ततः कृताकृतानित्याद्युक्तानेतानेव सर्वान्विनायकेभ्यस्तज्जनन्यै चोपाहृत्य उपायनीकृत्य भूमौ शिरः कृत्वा ततः नमस्कृत्य शूर्पे कुशानास्तीर्य तत्रार्थात् उपहारशेषमास्तीर्य निधाय चतुष्पथे दद्यादित्यनुषज्यते । शूर्पस्थितमेव निदध्यादित्यर्थः । विनायकनमस्कारे मन्त्रः तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् । आम्बिकानमस्कारे तु मन्त्र सुभगायै विद्महे, काममालिन्यै धीमहि तन्नो गौरी प्रचोदयात् ।

(१) तथैवोण्डेरकस्रजः—इति मुद्रितपुस्तके पाठः ।
(२) समाहृत्य—इति मुद्रिते पाठः । (३) भगवन्—इति मु० पु० पाठः ।
(४) पशून्—इति ख० पु० पाठः । (५) सर्वकामांश्च—इति मु० पु० पाठः ।

चतुष्पथनिधाने मन्त्रास्तु—

बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा ।
मरुतोऽथाश्विनौ देवाः सुपर्णाः पन्नगा ग्रहाः ॥
असुरा यातुधानाश्च पिशाचोरग मातरः ।
शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥
जृम्भकाः (१)सिद्धगन्धर्वा नागा विद्याधरा नराः ।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥
जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ।
मा विघ्नो मा च मे पापं मा सन्तु परिपन्थिनः ॥
सौम्या भवन्तु तृप्तास्तु भूताः प्रेताः शुभावहाः ।

कृताकृताः सकृदवहतास्तण्डुलाः, पललं तिलपिष्टं तन्मिश्र ओदनः पललौदनः, पक्वा आमाश्च मत्स्याः, मांसं एतावत् पक्वमपक्वं च, चित्रं रक्तपीतादिना नानावर्णं पुष्पं, सुगन्धश्चन्दनादिः, त्रिविधा सुरा गौडी पैष्टी माध्वी च, मूलकं, पूरिकापूपश्च प्रसिद्धः, तुण्डेरिकाः पिष्टमय्यस्तासां स्रजः, दध्यन्नं दधिमिश्रमन्नं, पायसं परमान्नं, गुडपिष्टं गुडमिश्रं शाल्यादिपिष्टं मोदका लड्डुकास्तत्सहितम् । चकारादयोऽव्ययशब्दाः परस्परसाहित्यावश्यकत्वार्थाः । ततः शूर्पनिधानानन्तरं सकुसुमजलेनाऽर्घ्यं दत्त्वा दूर्वया सर्षपेण पुष्पेण पूर्णमञ्जलिं दत्त्वाऽर्थाद्विनायकजनन्यै उपस्थानीयायै 'रूपं देही'त्यादिमन्त्रेण विनायकजननीमम्बिकामुपतिष्ठेदित्यर्थः । अत्र विनायकायाऽर्घं दत्त्वा पूर्ववदञ्जलिं दत्त्वा विनायकमप्युपतिष्ठेत् । मन्त्रे च भगवन्निति पुंलिङ्गोहः कार्य इति साम्प्रदायिकाः । अत्रोपहारादिकं सर्वं कर्म यजमानकृत्यं, उपहर्तव्यमन्त्रलिङ्गादिति वदन्ति ॥ २८६-२९१ ॥

ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
ब्राह्मणान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि ॥ २९२ ॥

(वी० मि०) ततो यजमानः शुक्लाम्बरमाल्यादियुक्तः । ब्राह्मणान् भोजयेत् गुरोश्च वस्त्रयुग्मं दद्यात् । अपिशब्देन कर्माङ्गदक्षिणासमुच्चयः । वस्त्र एव दक्षिणा, अपिशब्दस्तु भोजनसमुच्चयार्थ इत्यप्याहुः ॥ २९२ ॥

(१) जृम्भकाश्चैव गन्धर्वाः—इति ख० पु० पाठः ।

(मिता०) स्नातस्येति । ततश्चतुर्थं कलशमादाय पूर्वोक्तैस्त्रिभिर्मन्त्रैरभिषिञ्चेत् । 'सर्वमन्त्रैश्चतुर्थम्' इति म(१)न्त्रलिङ्गात् । उक्तेन प्रकारेण कृताभिषेकस्य मूर्धनि सव्यपाणिगृहीतकुशान्तर्हिते सार्षपं तैलं उदुम्बरवृक्षोद्भवेन स्रुवेण वक्ष्यमाणैर्मन्त्रैर्जुहुयादाचार्यः॥२८४॥

(मिता०) मितश्चेति । मितसंमितादिभिर्विनायकस्य नामभिः स्वाहाकारान्तैः प्रणवादिभिर्जुहुयादिति गतेन संबन्धः । स्वाहाकारयोगाच्चतुर्थी विभक्तिः । अतश्च ॐमिताय स्वाहा ॐसंमिताय स्वाहा ॐशालाय स्वाहा ॐकटङ्कटाय स्वाहा ॐकूष्माण्डाय स्वाहा ॐराजपुत्राय स्वाहेति षट् मन्त्रा भवन्ति । अनन्तरं लौकिकेऽग्नौ स्थालीपाकविधिना चरुं श्रपयित्वा एतैरेव षड्भिर्मन्त्रैस्तस्मिन्नेवाग्नौ हुत्वा तच्छेषं बलिमन्त्रैरिन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तानां नामभिश्चतुर्थ्यन्तैर्नमोऽन्वितैस्तेभ्यो बलिं दद्यात् ॥ २८५ ॥

(मिता०) अनन्तरं किं कुर्यादित्या(२)ह—

दद्यादित्यादि । कृताकृताद्युपहारद्रव्यजातं विनायकस्योपाहृत्य संनिधानात्तज्जनन्याश्च शिरसा भूमिं गत्वा 'तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात्' इत्यनेन मन्त्रेण विनायकं, 'सुभगायै विद्महे काममालिन्यै धीमहि । तन्नो गौरी प्रचोदयात्' इत्यनेनाऽम्बिकां च नमस्कुर्यात् । तत उपहारशेषमास्तीर्णकुशे शूर्पे निधाय चतुष्पथे निदध्यात् । 'बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा । मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च पि(३)शाचोरगमातरः । शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृम्भकाः सिद्धगन्धर्वा माया(४)विद्याधरा नराः । दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः । मा विघ्नो मा च मे पापं मा सन्तु परिपन्थिनः ॥ सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः' ॥ इत्येतैर्मन्त्रैः ॥ कृताकृताः सकृदवहतास्तन्दुलाः । प(५)ललं तिलपिष्टं तन्मिश्र ओदनः पललौदनः । मत्स्याः पक्का अपक्काश्च । मांसमेतावदेव पक्कमपक्कं च । पुष्पं चित्रं रक्तपीतादिनानावर्णम् । चन्दनादि सुगन्धि द्रव्यम् । सुरा त्रिविधा गौडी माध्वी पैष्टी च । मूलकं मूलकः कन्दा-

(१) स्मृतिलिङ्गाव् ग० । (२) दित्याह दद्यादित्यादिचतुर्भिः ग० ।
(३) पिशाचा मातरोरगाः क. । (४) माला विद्या. क. । (५) पललं पिष्टं क. ।

कारो भक्ष्यविशेषः । पूरिका प्रसिद्धा । अपूपः स्नेहपक्को गोधूमविकारः । उण्डेर(१)काः पिष्टादिमय्यस्ताः प्रोताः स्रजः । दध्यन्नं दधिमिश्रमन्नम् । पायसं क्षैरेयम् । गुडपिष्टं गुडमिश्रं शाल्यादिपिष्टम् । मोदकाः लड्डुकाः । अनन्तरं विनायकं तज्जननीमाम्बिकां वक्ष्यमाणमन्त्रेणोपतिष्ठेत ॥

(मिता०) किं कृत्वेत्याह—

दूर्वेति । सकुसुमोदकेनार्घ्यं दत्त्वा दूर्वासर्षपपुष्पाणां पूर्णमञ्जलिं दत्त्वोपतिष्ठेदिति गतेन सम्बन्धः ॥ २९० ॥

(मिता०) उपस्थानमन्त्रमाह—

रूपमिति । तत इति च । (२)अम्बिकोपस्थाने भगवतीत्यूहः । ततोऽभिषेकानन्तरं यजमानः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनो ब्राह्मणान्भोजयेद्यथाशक्ति । गुरवे श्रुताध्ययनवृत्तसम्पन्नाय विनायकस्नपनविधिज्ञाय वस्त्रयुग्मं दद्यात् । अपिशब्दाद्यथाशक्ति दक्षिणां विनायकोद्देशेन ब्राह्मणेभ्यश्च । तत्रायं प्रयोगक्रमः—चतुर्भिर्ब्राह्मणैः सार्धमुक्तलक्षणो गुरुर्मन्त्रज्ञो भद्रासनरचनानन्तरं तत्संनिधौ विनायकं तज्जननीं चोक्तमन्त्राभ्यां गन्धपुष्पादिभिः समभ्यर्च्य चरुं श्रपयित्वा भद्रासनोपविष्टस्य यजमानस्य पुण्याहवाचनं कृत्वा चतुर्भिः कलशैरभिषिच्य सार्षपं तैलं शिरसि हुत्वा चरुहोमं विधायाऽभिषेकशालायां चतुर्दिक्षु इन्द्रादिलोकपालेभ्यो बलिं दद्यात् । यजमानस्तु स्नानानन्तरं शुक्लमाल्याम्बरधरो गुरुणा सहितो विनायकाम्बिकाभ्यामुपहारं दत्त्वा शिरसा भूमिं गत्वा कुसुमोदकेनार्घ्यं दत्त्वा शिरसा भूमिं गत्वा कुसुमोदकेनार्घ्यं दत्त्वा दूर्वासर्षपपुष्पाञ्जलिं च दत्त्वा विनायकमम्बिकां चोपतिष्ठेत् । गुरुरुपहारशेषं शूर्पे कृत्वा चत्वरे निदध्यात् । अनन्तरं वस्त्रयुग्मं दक्षिणां ब्राह्मणभोजनं च दद्यादिति । इति विनायकस्नपनविधिः ॥ २९१—२९२ ॥

(वी० मि०) उक्तायाः शान्तेः फलमाह—

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ॥
कर्मणां फलमाप्नोति श्रियं चा(३)प्नोत्यनुत्तमाम् ॥२९३॥

(१) उण्डेरकाः क्षुद्रापूपा इति कौस्तुभे ।
(२) विनायकोपस्थाने भगवन्नित्यूहः क० ख० । (३) ग्रहपूजा लक्षति ग० ।

एवमुक्तप्रकारेण विनायकं सम्पूज्य कर्मणां फलं विघ्नोपशमद्वारेणाप्नोति । न केवलं शान्तिकमिदं कर्म, किन्तु पौष्टिकमपीत्याह श्रियं चेति । न विद्यते उत्तमा यतस्तादृशीमनुत्तमां श्रियं धनादिसम्पत्तिमाप्नोति । चकाराद् ग्रहयज्ञवक्ष्यमाणफलान्तराणां समुच्चयः । कर्मफलसिद्धेर्वक्ष्यमाणग्रहपूजाफलत्वमाह ग्रहांश्चेति । विधानतो वक्ष्यमाणप्रकारेण ग्रहान् सम्पूज्य कर्मणां फलमाप्नोति । पूज्येति छान्दसः प्रयोगः । चकारेण ग्रहपूजायां ब्राह्मणभोजनाद्युत्तराङ्गसमुच्चयः । एवकारोऽवधारणे, तेन प्राप्नोत्येवेत्यन्वयः ॥ २९३ ॥

(मिता०) अस्यैव विनायकस्नपनस्योक्तोपसंहारेण संयोगान्तरं दर्शयितुमाह—

एवमिति । एवमुक्तेन प्रकारेण विनायकं संपूज्य कर्मणां फलमविघ्नेनाप्नोतीत्युक्तोपसंहारः । संयोगान्तरमाह श्रियं चोत्कृष्टतमामाप्नोतीति । श्रीकामश्चानेनैव विधानेन विनायकं पूजयेदित्यर्थः । आदित्यादिग्रहपीडाशान्तिकामस्य लक्ष्म्यादिकामस्य च ग्रहपूजादिकल्पं विधास्यन् ग्रह(१)पूजामुपक्षिपति ग्रहांश्चैव विधानत इति । ग्रहानादित्यादीन्वक्ष्यमाणेन विधिना संपूज्य कर्मणां सिद्धिमाप्नोति श्रियं चाप्नोति ॥ २९३ ॥

(वी० मि०) विनायकशान्तिप्रसङ्गेन तत्फलीभूतकर्मसिद्धिफलकान् धर्मानाह—

आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ॥
महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥ २९४ ॥

सदा प्रत्यहं सूर्यस्य गणपतेश्च पूजां, स्वामिनः कार्तिकेे गोरोचनादिमाङ्गल्येन तिलकं तथापदेन पूजां च कुर्वन् कर्मणामारब्धानामपेक्षितानां वा सिद्धिं निष्पत्तिमवाप्नोतीत्यर्थः । महत्पदं च महाभारतवत्प्रशंसार्थं महेन्द्रवद्वा महागणपतिर्देवतान्तरस्तुतशास्त्रनयात् । चकारेण पूजा, फलान्तरस्य तत्तत्पुराणाद्युक्तस्य समुच्चयः । एवकारः क्रियान्वयी फलावश्यंभावपरः । मिताक्षरायान्तु सिद्धिपदं मोक्षपरतया व्याख्यातम् । सुवर्णतिलकस्य पूजायाश्चादित्यादौ सर्वत्र सम्बन्ध उक्तः । तिलकस्य प्रकरणेन तद्दानमप्याक्षिप्यते॥२९४॥

---

(१) प्राप्नोत्यनुत्तमाम्—इति क० पु० पाठः ।

(मिता०) नित्यकाम्यसंयोगानाह—

आदित्यस्येति। आदित्यस्य भगवतः सदा प्रतिदिवसं रक्तचन्दनकुङ्कुमकुसुमादिभिः पूजां कुर्वन् स्कन्दस्य महागणपतेश्च नित्यं पूजां कुर्वन् सिद्धिं मोक्षमात्मज्ञानद्वारेण प्राप्नोतीति नित्यसंयोगः। आदित्यस्कन्दगणपतीनामन्यतमस्य सर्वेषां वा तिलकं स्वर्णादिनिर्मितं रूप्यनिर्मितं वा कुर्वन् सिद्धिमभिलषितामाप्नोति। तथा चक्षुषी चेति काम्यसंयोगः॥ २९४॥

(वी० मि०) ग्रहांश्चैव विधानत इत्युक्तं, तत्र विधानं दर्शयिष्यन् कर्मसिद्धेः प्रागुक्ताया अतिरिक्तं फलमाह—

श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्॥
वृष्ट्यायुःपुष्टिकामो वा तथैवाऽभिचरन्नपि॥ २९५॥

श्रीर्व्याख्याता, शान्तिर्धर्मद्वारा ऐहिकानिष्टनिवृत्तिः, वृष्टिर्वर्षं, आयुरपमृत्युजयेन दीर्घकालजीवनं, पुष्टिरपूर्वाभीष्टलाभोपलब्धपरिरक्षणं च, एतदन्यतरकामः अभिचरन् अदृष्टोपायेन परपीडां कामयमानो वा ग्रहयज्ञं ग्रहोद्देश्यकं सम्यक् शास्त्रोक्तेन विधिना आचरेत्कुर्यात्। वाकाराभ्यामेकस्मिन् प्रयोग एकमेव फलमिति यागसिद्धिन्यायसिद्धमभिहितम्। अपिशब्देनाऽऽरोग्यसमुच्चयः। तथैवेत्यनेनाऽभिचारकामस्यापि श्रीकामादिवदेवेतिकर्तव्यता, न तु अभिचारेष्टिवद्विशेष इति दर्शितम्॥ २९५॥

(मिता०) 'ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमाम्' इत्यनेन ग्रहपूजया कर्मणामविघ्नेन फलसिद्धिः श्रीश्च फलमित्युक्तम्। इदानीं फलान्तराण्याह—

श्रीकाम इति। श्रीकाम इति पूर्वोक्तस्यानुवादः। शान्तिकाम आपदुपशान्तिकामः। सस्यादिवृद्ध्यर्थं प्रवर्षणं वृष्टिः। आयुरपमृत्युजयेन दीर्घकालजीवनम्। पुष्टिरनवद्यशरीरत्वम् एताः कामयत इति वृष्ट्यायुःपुष्टिकामः। एते श्रीकामादयो ग्रहयज्ञं ग्रहपूजां समाचरेयुः। तथाऽभिचरन्नपि अदृष्टोपायेन परपीडा अभिचारस्तत्कामश्च ग्रहयज्ञं समाचरेत्॥ २९५॥

(वी० मि०) ग्रहानाह—

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ॥
शुक्रः शनैश्चरो राहुः केतुश्चैव ग्रहाः स्मृताः ॥२९६॥

स्मृताः स्मृतावुक्ताः । चकारात् श्रुतावुक्ताश्च । एवकारेणाऽन्येषां ग्रहत्वं व्यवच्छिनत्ति । एषां महीपुत्रादिशब्देनोपात्तानामपि देवतात्वं महादानाद्युक्तरूपेण बोध्यम् । केतुरित्येकवचनं गणाभिप्रायेण केतूनां बहुत्वात् ॥ २९६ ॥

(मिता०) ग्रहानाह—

सूर्य इति । एते सूर्यादयो नवग्रहाः ॥ २९६ ॥

(वी० मि०) ग्रहपूजायाः प्रतिमासाध्यत्वात्तत्र द्रव्याण्याह—

ताम्रकात्स्फाटिकाद्रक्तचन्दनात्स्वर्णकादुभौ ॥
रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात् ॥ २९७ ॥

अत्र पञ्चम्यस्तृतीयार्थाः । ग्रहप्रतिमाकारास्तु स्मृत्यन्तरे द्रष्टव्याः, विस्तरभयान्नेह लिखिताः ॥ २९७ ॥

(वी० मि०) इदं च चिरकालव्यापिनोऽयुतहोमादेः करणपक्षे, इतरथा तु पटादिलिखितेष्वेव ग्रहेषु पूजा कार्येत्याह—

स्ववर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेऽथवा (१) ॥

स्ववर्णैस्तत्तद्ग्रहसमानवर्णैर्वर्णकैः पटे वस्त्रे ग्रहा लेख्याः । अथवा गन्धैश्चन्दनादिभिः मण्डलके सम्यक् संस्कृतभूभागे लेख्याः । प्रथमवाकारेणानुक्तैस्ताम्रपात्रादिभिर्विकल्पमाह । तथा च देवीपुराणम्—

ताम्रपात्रे च कर्तव्या ग्रहा भागविकल्पिताः ।
श्यामे वा मण्डले वापि सर्वकामफलप्रदाः ॥

इति ॥

(वी० मि०) पूजाविधिमाह—

यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ २९८ ॥
गन्धाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः ॥
कर्तव्या मन्त्रवन्तश्च चरवः प्रतिदैवतम् ॥ २९९ ॥

गन्धाश्च यथावर्णं तत्तद्ग्रहवर्णानुसारेण देयाः । बलयो वक्ष्य-

(१) मण्डलकेषु वा—इति मुद्रितपुस्तके पाठः ।

माणा देयाः । धूपश्चाऽसम्भवे सर्वेषां गुग्गुलुर्देयः । सम्भवे तु चिन्तामणौ विशेषः—

रवेः कुन्दुरकं धूपः शशिनस्तु घृतं य(१)था ।
भौमे सर्जरसं चैव अगुरुश्च बुधे स्मृतः ॥
सिह्लं(२)गुरवे दद्याच्छुक्रे बिल्वागुरु स्मृतम् ।
गुग्गुलं मन्दवारे तु लाक्षा राहोश्च केतवे ॥

प्रतिदैवतं तं तं ग्रहमुद्दिश्य 'सूर्याय त्वा जुष्टं निर्वपामी'त्यादिनिर्वापमन्त्रवन्तश्चरवोऽम्बरवाप्पसिद्धौदनाः कर्तव्याः । कुसुमानि चेति चकारेणाऽक्षताश्च यथावर्णं देया इत्युक्तम् । गन्धाश्चेति चकारो दीपसमुच्चयार्थः । बलयश्चेति नैवेद्यसमुच्चयार्थः । एवकार आवश्यकत्वार्थः । देयश्चेति चकारेण फलाधिक्यार्थकताम्बूलादेः परिग्रहः । मन्त्रवन्तश्चेति चकारेण चतुर्मुष्टिपरिमितत्वादिचतुर्धर्मसमुच्चयोर्थः ॥ २९८—२९९ ॥

(मिता०) ग्रहाः पूज्या इत्युक्तं, किं कृत्वेत्याह—

ताम्रकादिति । सूर्यादीनां मूर्तयस्ताम्रादिभिर्यथाक्रमं कार्याः, तदलाभे स्ववर्णैर्वर्णकैः पटे लेख्याः । गन्धैर्मण्डलकेषु वा । गन्धैः रक्तचन्दनादिभिर्यथावर्णं लेख्या इत्यन्वयः । द्विभुजत्वादिविशेषस्तु मत्स्यपुराणोक्तो द्रष्टव्यः । यथा—'पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । स(३)प्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः ॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः । गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः । चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ । दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः । बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥ करालवदनः खड्गचर्मशूली वरप्रदः । नी(४)लः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः । गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥ सर्वे किरीटिनः कार्या ग्रहा

---

(१) तथा—इति ख० पु० पाठः । (२) सिंहक—इति ख० पु० पाठः ।
(३) सप्ताश्वः सप्तरज्जुश्च क० । (४) नीलसिंहासनः क० ग० ।

लोकहितावहाः । स्वाङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा' इति ॥ एतेषां स्थापनदेशश्च तत्रैवोक्तः-'मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु । उत्तरेण गुरुं विद्याद् बुधं पूर्वोत्तरेण तु ॥ पूर्वेण भार्गवं विद्यात्सोमं दक्षिणपूर्वके । पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥ पश्चिमोत्तरतः केतुं स्थाप्या वै शुक्लतण्डुलैः' ॥ इति ॥ २९७ ॥

(मिता०) ग्रहपूजाविधिमाह—

यथावर्णमिति । यथावर्णं यस्य ग्रहस्य यो वर्णस्तद्वर्णानि वस्त्रगन्धपुष्पाणि देयानि । बलयश्च । धूपश्च सर्वेभ्यो गुग्गुलुर्देयः । चरवश्च प्रतिदैवतमग्निप्रतिष्ठापनान्वाधानादिपूर्वकं 'चतुरश्चतुरो मुष्टीन्निर्वपत्यमुष्मै त्वा जुष्टं निर्वपामी'त्यादिविधिना कार्याः । अनन्तरं सुसमिद्धेऽ(१)ग्नाविध्माधानाद्याघारान्तं कर्म कृत्वा आदित्याद्युद्देशेन यथाक्रमं वक्ष्यमाणमन्त्रैर्वक्ष्यमाणाः समिधो वक्ष्यमाणप्रकारेण हुत्वा चरवो होतव्याः ॥ २९९ ॥

(वी० मि०) पूजाबलिदानयोर्वक्ष्यमाणहोमे च सूर्यादीनां क्रमेण मन्त्रानाह—

आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत् ॥
उद्बुध्यस्वेति च ऋचो यथासङ्ख्यं प्रकीर्तिताः ॥ ३०० ॥
बृहस्पते अतियदर्यस्तथैवान्नात्परिस्रुतः ॥
शंनोदेवीस्तथा काण्डात्केतुं कृण्वन्निमास्तथा ॥ ३०१ ॥

'आकृष्णेन रजसे'ति, 'इमं देवा' इति, 'अग्निर्मूर्द्धा दिवः ककु'दिति, 'उद्बुध्यस्वाग्ने' इति, 'बृहस्पते अतियदर्य' इति, 'अन्नात्परिस्रुतो रस'मिति, 'शन्नोदेवीरभिष्टय' इति, 'काण्डात्काण्डात्प्ररोहन्ती'ति, 'केतुं कृण्व'न्नितीमा ऋचः सूर्यादीनां यथासङ्ख्यं प्रकीर्तिताः । तथाशब्दैश्चकारेण तत्तच्छाखोक्तान् मन्त्रान् शाखाविशेषव्यवस्थितानभिप्रैति । एवकारेणाऽपरशाखीयमन्त्रव्यवच्छेदः ॥ ३००-३०१ ॥

(मिता०) ग्रहमन्त्रानाह—

आकृष्णेनेति । बृहस्पते इति च । आकृष्णेन रजसा वर्तमान इत्यादयो नव मन्त्रा यथाक्रममादित्यादीनां वेदितव्याः ॥ ३००-३०१ ॥

---

(१) ऽग्नावन्वाधानादनन्तरं कर्म कृत्वा क० ।

(वी० मि०) तत्तद्ग्रहसमिधां विशेषं दर्शयन्नेव तद्धोमसङ्ख्यादिविशिष्टमाह —

अर्कः पलाशः खदिर(१)स्त्वपामार्गोऽथ पिप्पलः ॥
उदुम्बरः(२)शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ ३०२ ॥
एकैकस्य त्वष्ट(३)शतमष्टाविंशतिरेव वा ॥
होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः ॥ ३०३ ॥

सूर्यादेः क्रमादेकैकस्याष्टशतमष्टाधिकं शतमष्टाविंशतिर्वाऽर्काद्याः समिधो मधुघृताभ्यां युक्तेन दध्ना क्षीरेण वा संयुताः सत्यो होतव्याः। समित्संख्या चाहुतिसंख्यामेवोपलक्षयति। क्षीरेणेत्यादौ 'चैव समन्विताः' इति साम्प्रदायिकः पाठः। अपामार्गः 'चटचडी'ति (४)प्रसिद्धः। एवकारेण सर्वत्र ग्रहहोमे संख्येयमावश्यकीत्युक्तम्। अयुतहोमादौ तु आज्यतिलव्रीहियवक्षीरसमिद्भिः समसंख्यका एव होमाः कार्याः 'समं स्या'दिति न्यायात। यद्वा तत्रापि समिधामुक्तैव सङ्ख्या। आज्यादिभिश्च यथालाभमयुतादिसङ्ख्या पूरणीयेति। अथशब्देन एकस्य ग्रहस्याऽशेषसमिद्धोमानन्तरमपरस्य ग्रहस्य समिद्धोम इति क्रमं दर्शयति। चकारेणाऽयुतहोमादावाज्यादिद्रव्यसमुच्चयः। तुशब्दौ पादपूरणार्थौ। चिन्तामणौ तु ग्रहहोमप्रकरणे—

अष्टोत्तरसहस्रं वा शतमष्टाधिकं तथा।
अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत् ॥
प्रादेशमात्रा अशिखाः अशुष्काश्च फलाशिनीः (?)।
समिधः कल्पयेत्प्राज्ञः सर्वकर्मसु सर्वदा ॥
देवानामपि सर्वेषां पालाशी परमार्थवित्।

इत्यादिस्मृत्यन्तरीयाः समिधां विशेषास्तत्र तत्राऽवगन्तव्याः ॥ ३०२—३०३ ॥

(मिता०) इदानीं समिध आह—

अर्क इति। अर्कपलाशादयो यथाक्रमं सूर्यादीनां समिधो भव·

(१) खदिर अपामार्गोऽथ—इति मुद्रितपुस्तके पाठः।
(२) औदुम्बरः—इति क० पु० पाठः।
(३) एकैकस्याष्टशतकं—इति क० पु० पाठः, एकैकस्याप्याष्टशतं—इति मुद्रितपुस्तके पाठः।
(४) अस्मिन् प्रान्तेऽधुनातनैः 'चिचिडा' इति भाषायामुच्यते सं०।

न्ति । ताश्चार्द्रा अभग्नाः सत्वचः प्रादेशमात्राः कर्तव्याः ॥ ३०२ ॥

(मिता०) किञ्च--

एकैकस्येति । आदित्यादीनामेकैकस्याऽष्टशतसंख्या अष्टाविंशतिसंख्या वा यथासंभवं मधुना सर्पिषा दध्ना क्षीरेण वा युता अक्ता अर्कादिसमिधो होतव्याः ॥ ३०३ ॥

(वी० मि०) बलिद्रव्याणि कथयन्नेव तेषां विनियोगमाह—

गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकम् ॥
दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ॥ ३०४ ॥
दद्याद्ग्रहक्रमादेत(१)द्द्विजेभ्यो भोजनं बुधः ॥
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम् ॥ ३०५ ॥

शक्तितः शक्तौ सत्यामेतत् गुडौदनादि सूर्यादिग्रहक्रमेण । गुडौदनाद्यसम्भवे वा यथालाभं घृतपायसाद्येकजातीयमेव सर्वग्रहेभ्यो विधिपूर्वकं बलिरूपतयोत्सृज्य तदेव ब्राह्मणेभ्यो भोजनं सत्कृत्य दद्यात् । क्षीरषाष्टिकं क्षीरमिश्रं षाष्टिकौदनं, हविः सघृतौदनं, चूर्णं तिलचू(२)र्णमिश्रौदनं, चित्रान्नम्--

तिलतण्डुलमुद्गं च अजाक्षीरं च शोणितम् ।
कर्णनासागृहीतं स्याच्चित्रौदनमुदाहृतम् ॥

इति परिभाषितं, शेषं प्रसिद्धम् । एवकारेण शक्तावुक्तद्रव्यविशेषाणामावश्यकत्वं दर्शयति । चकारेण स्मृत्यन्तरोक्तद्रव्याण्यभ्यनुजानीते । यथा--

गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम् ।
अङ्गारके मसुरान्नं क्षीरान्नं सोमसूनवे ॥
दध्योदनं च जीवाय शुक्राय च घृतौदनम् ।
शनैश्चराय कृसरमाजमांसं च राहवे ॥
चित्रौदनं च केतुभ्यः सर्वभक्षैरथाऽर्चयेत् । —३०४-३०५ ॥

(मिता०) इदानीं भोजनान्याह—

गुडौदनमिति । दद्यादिति च । गुडमिश्र ओदनो गुडौदनः । पायसम् । हविष्यं मुन्यन्नादि । क्षीरषाष्टिकं क्षीरमिश्रः षाष्टिकौदनः ।

---

(१) दद्याद् ग्रहक्रमादेवं—इति मुद्रितपुस्तके पाठः ।
(२) तिलचूर्णमिश्रौदनं—इति ख० पु० पाठः ।

दध्ना मिश्र ओदनो दध्योदनः। हविर्घृतौदनः। चूर्णं तिलचूर्णमिश्र ओदनः। मांसं भक्ष्यमांसमिश्र ओदनः। चित्रौदनो नानावर्णौदनः। एतानि गुडौदनादीनि यथाक्रममादित्याद्युद्देशेन भोजनार्थं द्विजेभ्यो ब्राह्मणेभ्यो दद्यात्। ब्राह्मणसंख्या यथाविभवं द्रष्टव्या। गुडौदनाद्यभावे तु यथालाभमोदनादि पादप्रक्षालनादिविधिपूर्वकं सत्कृत्य संमानपुरःसरं दद्यात्॥ ३०४-३०५॥

(वी० मि०) ग्रहयज्ञदक्षिणामाह—

धेनुः शङ्खस्तथाऽनड्वान् हेम वासो हयः क्रमात्॥
कृष्णा गौरायसं छाग एता वै दक्षिणाः स्मृताः॥३०६॥

धेन्वादिकं क्रमात् सूर्यादिग्रहयज्ञदक्षिणात्वेन तत्तद्ग्रहप्रीतिकामो द्विजेभ्यो दद्यादिति पूर्वश्लोकस्थमनुषज्यते। तथाशब्देनाऽसम्भवे हिरण्यस्य सर्वत्र दक्षिणात्वमुक्तम्। वैशब्दः पादपूरणाय॥ ३०६॥

(मिता०) दक्षिणामाह—

धेनुरिति। धेनुर्दोग्ध्री। शङ्खः प्रसिद्धः। अनड्वान् भारस(१)हो बलीवर्दः। हेम सुवर्णम्। वासः पीतम्। हयः पाण्डुरः। कृष्णा गौः। (२)आयसं शस्त्रादि। छागः प्रसिद्धः। एता धेन्वादयो यथाक्रममादित्याद्युद्देशेन ब्राह्मणानां दक्षिणाः स्मृताः उक्ता मन्वादिभिः। एतच्च सम्भवे सति। असम्भवे तु यथालाभं शक्तितोऽन्यदेव यत्किञ्चिद्देयम्॥३०६॥

(वी० मि०) शान्तिकामो ग्रहयज्ञं समाचरेदित्यनेन सर्वग्रहाणां सति सम्भवे पूज्यत्वमुक्तम्, असम्भवे त्वाह—

यस्य यश्च यदा दुःस्थः स तं यत्नेन पूजयेत्॥
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ॥ ३०७॥

यस्य पुंसो यो ग्रहो यदा दुःस्थः अष्टमादिस्थानस्थः स तं ग्रहं तदा यत्नेन उक्तसकलाङ्गसम्पादनेन पूजयेत्। चकारस्त्वर्थः, तेन दुःस्थभिन्नस्य विशिष्टपूजावश्यकं व्यवच्छिद्यते। स्वल्पा तु पूजाऽन्येषामपि ग्रहाणां कार्यैव।

यस्तु पीडाकरो नित्यमल्पवित्तस्य वा पुनः।
तं तु यत्नेन सम्पूज्य शेषानप्यर्चयेद् बुधः॥

(१) भारवाहो क० ग०।

(२) आयसमस्त्रादि, आयसं ताम्रादि क०।

इति वचनात् । ग्रहपूजनेन शान्तिर्भवतीत्यत्र हेतुत्वमाह ब्रह्मणेति । पूजिताः सन्तो भवन्तः पूजकान् पूजयिष्यथ शान्त्यादिरूपेष्टलाभेन प्रीणयिष्यथ इति एषां एभ्यो ग्रहेभ्यो ब्रह्मणा वरो दत्त इत्यर्थः ॥ ३०७ ॥

(मिता०) शान्तिकामेनाविशेषेण सर्वे ग्रहाः पूजयितव्या इत्युक्तं तत्र विशेषमाह—

यस्येति । यस्य पुरुषस्य यो ग्रहो यदा दुःस्थोऽष्टमादिदुष्टस्थानस्थितः स तं ग्रहं तदा यत्नेन विशेषेण पूजयेत् । यस्मादेषां ग्रहाणां ब्रह्मणा पूर्वं वरो दत्तः पूजिताः सन्तो यूयमिष्टप्रापणेनाऽनिष्टनिरसनेन च पूजयितारं पूजयिष्यथेति ॥ ३०७ ॥

(वी० मि०) ग्रहपूजने शान्त्याद्यर्थे सर्वेषामधिकारविशेषेऽपि राज्ञा राज्याभ्युदयार्थं विशेषतस्ते पूज्या इत्याह—

ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च ॥
भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ॥ ३०८ ॥

नरेन्द्राणां अभिषिक्तक्षत्रियाणामुच्छ्रायाः ऐश्वर्यादयः पतनानि तद्भ्रंशादयश्च ग्रहाधीनाः । जगतः तत्परिपालनीयस्य लोकसमूहस्य भावाभावौ जन्ममरणे ग्रहाधीनौ । तस्माद्राज्ञा स्वीयसाधारणयोगक्षेमार्थं परिपालनीयलोकहितार्थं च ग्रहाः पूज्यतमाः । यथाऽन्येषां पूज्यास्ततोऽप्यतिशयेन पूज्या इत्यर्थः ॥ ३०८ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने शान्तिप्रकरणम् ।

(मिता०) अविशेषेण द्विजानधिकृत्य शान्तिकपौष्टिकादीनि कर्माण्यनुक्रान्तानि तत्राभिषे(१)कगुणयुक्तस्य राज्ञो विशेषेणाधिकार इत्याह—

ग्रहाधीना इति । नरेन्द्राणामभिषिक्तक्षत्रियाणां ग्रहाः पूज्यतमाः । अनेना(२)न्येषामपि पूज्या इति गम्यते । उभयत्र कारणमाह—प्राणिनामभ्युदयविनिपाता ग्रहाधीनाः यस्मात्तस्मादधिकारिभिः पूज्याः । किं च जगतः स्थावरजङ्गमात्मकस्य भावाभावावुत्पत्तिनिरोधौ ग्रहाधीनौ । तत्र यद्येते पूजितास्तदा स्व(३)काल एवोत्पत्तिनि-

---

(१) भिषेकयुक्तस्य ख० । (२) अथ चान्येषामपि ख० ।
(३) स्वकालादुत्पत्ति ग० ।

रोधौ भवतः। अन्यथा उत्पत्तिसमये नो(१)त्पादोऽनिरोधकाले नि-रोधश्च। जगदीश्वरत्वाच्च नरेन्द्राणां तद्योगक्षेमकारिणां पूज्यतमा ग्रहा इति तेषां विशेषेण शान्तिकादिष्वधिकारः। तथा च गौतमेन—'राजा सर्वस्येष्टे ब्राह्मणवर्ज्यम्' इति राजानमधिकृत्य 'वर्णानाश्रमांश्च न्यायतोऽभिरक्षेच्च। 'ततश्चैतान्स्वधर्मे स्थापयेत्' इत्यादीन्कांश्चिद्ध-र्मानुक्त्वा—'यानि च दैवोत्पातचिन्तकाः प्रब्रूयुस्तान्याद्रियेत तदधी-नमपि ह्येके योगक्षेमं प्रतिजानते' इति शान्तिकपौष्टिकाद्यनुष्ठानहेतु-मभिधाय शान्तिकपुण्याहस्वस्त्ययनायुष्यमङ्गलसंयुक्तान्याभ्युदयि-कानि विद्वेषिणः स्त(२)म्भनाभिचारद्विषद्व्यृद्धियुक्तानि च शालाग्नौ कुर्यादिति शान्तिकादीनि दर्शितानि ॥ ३०८ ॥

इति ग्रहशान्तिप्रकरणम्।

(वी० मि०) साधारणान् गृहस्थधर्मानभिधाय वक्ष्यमाणं स-प्ताङ्गं राज्यं यथायथं प्रपञ्चयन्नेव नरेन्द्रपदेन प्रक्रान्तस्य राज्ञो गृहस्थ-स्य विशेषधर्मानाह सम्पूर्णप्रकरणेन—

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ॥
विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ॥३०९॥
अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा ॥
धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥ ३१० ॥
स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च ॥
विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः ॥ ३११ ॥

कुलीनः क्षत्रियकुलोत्पन्नो नराधिपो राज्याभिषिक्तः सन्महोत्सा-हादिः स्यादित्यर्थः। महानुत्साहः पुरुषार्थसाधनं तत्तत्कर्माध्यव-सायो यस्य स महोत्साहः। स्थूलं प्रचुरं लक्षं ब्राह्मणादिभ्यो देयत्वे-नेच्छाविषयो यस्य स स्थूललक्षः। कृतज्ञः परकृतोपकाराविस्मरण-शीलः। वृद्धानां ज्ञानवयस्तपोऽधिकानां सेवक उपासनकर्ता। विनीतो वशीकृतेन्द्रियः। सत्त्वं सम्पद्विपदोर्हर्षशोकातिशयाभावस्तत्सम्पन्नः तद्युक्तः। सत्यवाक् शास्त्रानभ्यनुज्ञातानृताभिधानशून्यः। शुचिः वा-

(१) तस्य नोत्पादो न काले क०। (२) संवननाभिचार ग०।

ह्याभ्यन्तरशौचयुक्तः । अवश्यकर्तव्यानां कर्मणामारम्भे आरब्धानां च समाप्तावविलम्बकारी अदीर्घसूत्रः । स्मृतिमान् राज्याद्युपयुक्तार्थाविस्मरणशीलः । अक्षुद्रः सद्गुणद्वेषशून्यः । अपरुषः शास्त्राननुमतपरुषाभिधानशून्यः । धार्मिको वर्णाश्रमधर्माचरणशीलः । अव्यसनः मृगयाऽक्षपानाद्यासङ्गशून्यः । प्राज्ञः इतिहासादिश्रवणेन । शूरोऽकातरः । रहस्यवित् मन्त्रणाचतुरः । स्वरन्ध्रं स्वस्य सप्ताङ्गराज्यस्य यत्परप्रवेशनद्वारं तस्य गोप्ता आच्छादयिता । आन्वीक्षिक्यां तर्कविद्यायाम् । दण्डनीत्यामर्थशास्त्रे । त्रय्यां ऋग्यजुःसामवेदरूपायाम् । वार्तायां कृषिवाणिज्यादिरूपायां वर्तनहेतुभूतायां विनीतस्तदभिज्ञैः प्रवीणतां नीतः । यदाह मनुः—

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च तद्विदः ।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ॥

एवकारैर्बहूनामेषामावश्यकत्वं तथाशब्दाभ्यां चकारैश्च ऋष्यन्तरोक्तानां राज्ञोऽन्तरङ्गधर्माणां समुच्चयो दर्शितः । एतेन स्वामिनो राज्याङ्गस्य प्रपञ्चनं कृतमित्यवधेयम् ॥ ३०९–३११ ॥

(मिता०) साधारणान्गृहस्थधर्मानुक्त्वेदानीं राज्याभिषेकादिगुणयुक्तस्य गृहस्थस्य विशेषधर्मानाह—

महोत्साह इति । अदीर्घसूत्र इति । स्वरन्ध्रगोप्तेति च । पुरुषार्थसाधनकर्मारम्भाध्यवसाय उत्साहः, महानुत्साहो यस्यासौ महोत्साहः । बहुदेयार्थदर्शी स्थूललक्षः । परकृतोपकारापकारौ न विस्मरतीति कृतज्ञः । तपोज्ञानादिवृद्धानां सेवकः । विनयेन युक्तो विनीतः । विनयशब्देनाविरुद्धः पूर्वोक्तस्नातकधर्मकलाप उच्यते—'न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्' इत्यादिनोक्तः । सत्त्वसंपन्नः सम्पदापदोर्हर्षविषादरहितः । मातृतः पितृतश्चाभिजनवान्कुलीनः । सत्यवाक्स(१)त्यवचनशीलः । शुचिर्बाह्याभ्यन्तरशुचियुक्तः । अवश्यकार्याणां कर्मणामारम्भे प्रारब्धानां च समापने यो न विलम्बतेऽसावदीर्घसूत्रः । अधिगतार्थाऽविस्मरणशीलः स्मृतिमान् । अक्षुद्रोऽसद्गुणद्वेषी । अपरुषः परदोषाकीर्तनः । धार्मिको वर्णाश्रमधर्मान्वितः । न विद्यन्ते व्यसनानि यस्यासावव्यसनः । व्यसनानि चाष्टादश । यथाह मनुः

(१) सत्यवादन ग० ।

(७।४७-४८)-'मृ(१)गयाऽक्षा दिवा स्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥ पै(२)शुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः'॥ इति। तत्र च सप्त कष्टतमानि। यथाह (मनुः ७।५०-५१) 'पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्। एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे॥ दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे। क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा'॥ इति। प्राज्ञो गम्भीरार्थावधारणक्षमः शूरो निर्भयः। रहस्यवित् गोपनीयार्थगोपनचतुरः। स्वरन्ध्रगोप्ता स्वस्य सप्तसु राज्याङ्गेषु यत्परप्रवेशद्वारशैथिल्यं तत्स्वरन्ध्रं तस्य गोप्ता प्रच्छादयिता। आन्वीक्षिक्यामात्मविद्यायां दण्डनीत्यामर्थयोगक्षेमोपयोगिन्यां, वार्तायां कृषिवाणिज्यपशुपालनरूपायां धनपचयहेतुभूतायां, त्रय्यां ऋग्यजुःसामा(३)ख्यायां च विनीतस्तत्तदभिज्ञैः प्रावीण्यं नीतः। यथाह मनुः-(७ ४३)-'त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च(४)शाश्वतीम्। आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः'॥ इति। नराधिपो राज्याभिषिक्तः। स्यादिति सर्वत्र सम्बन्धः॥ ३०९-३११॥

(वी० मि०) एवं राज्ञोऽन्तरङ्गान् धर्मानभिधाय अमात्यं राज्याङ्गं दर्शयन्नेव बहिरङ्गानाह 'विनीय स्थापयेत्पथी'त्यन्तेन—

स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन्॥
तैः सार्धं चिन्तयेद्राज्यं विप्रेणाऽर्थ ततः स्वयम्॥ ३१२॥

स राजा पूर्वोक्तगुणविशिष्टः सन् प्राज्ञान् हिताहितविवेककुशलान्, मौलान् कुलक्रमेण सेवकान्, स्थिरान् कदाचिदपि पराऽनाश्रितान्, बाह्याभ्यन्तरशुद्धियुक्तान्, मन्त्रिणः सचिवान् प्रकुर्वीत। मन्त्रिण इति बहुवचनेन सप्ताऽष्टौ वा मन्त्रिणः कार्या इत्युक्तम्। तथा च मनुः—

---

(१) आखेटकाख्यो मृगवधो मृगया, अक्षादिक्रीडा, दिवानिद्रा, परदोषकथनं, स्त्रीसम्भोगः, मद्यपानजनितो मदः, नृत्यगीतवादित्राणि त्रीणि, वृथाभ्रमणं—इति दश।

(२) पशुन्यमविज्ञातदोषाविष्करणं, साहसं साधोर्बन्धनिग्रहः, द्रोहश्छद्मवधः, ईर्ष्यान्यगुणासहिष्णुता, असूया परगुणेषु दोषाविष्करणं, अर्थदूषणमर्थानामपहरणं देयानामदानं च, वाक्पारुष्यमाक्रोशादि, दण्डपारुष्यं ताडनादि—इत्यष्टौ।

(३) साममय्यां ख०। (४) च तद्विदः ख०।

सचिवान् सप्त चाऽष्टौ वा कुर्वीत सुपरीक्षितान् ।

तैर्मन्त्रिभिर्व्यस्तैः समस्तैश्च सह राज्यं राजोपयोगिसन्धिविग्रहादि कार्यं चिन्तयेत् विचारयेत् ॥ ३१२ ॥

(मिता०) एवमभिषेकगुणयुक्तस्यान्तरङ्गान्धर्मानभिधायेदानीं बहिरङ्गानाह—

स मन्त्रिण इति । महोत्साहादिगुणैर्युक्तो राजा मन्त्रिणः कुर्वीत कथंभूतान्? प्राज्ञान् हिताहितविवेककुशलान् । मौलान् स्ववंशपरम्परायातान् । स्थिरान्महत्यपि (१) हर्षविषादस्थाने विकाररहितान् । शुचीन् धर्मार्थकामभयोपधाशुद्धान् । ते च सप्ताष्टौ वा कार्याः । यथाह मनुः (७।५४)–'मौला(२)ञ्शास्त्रविदः शूरान्ल(३)ब्धलक्षान्कुलोद्भवान् । सचिवान्सप्त चाष्टौ वा कुर्वीत सुपरीक्षितान्' ॥ इति । एवं मन्त्रिणः पूर्वं कृत्वा तैः सार्धं राज्यं सन्धिविग्रहादिलक्षणं कार्यं चिन्तयेत् समस्तव्यस्तैश्च । अनन्तरं तेषामभिप्रायं ज्ञात्वा सकलशास्त्रार्थविचारकुशलेन ब्राह्मणेन पुरोहितेन सह कार्यं विचिन्त्य ततः स्वयं बुद्ध्या कार्यं चिन्तयेत् ॥३१२ ॥

(वी० मि०) कीदृक् स पुरोहितो विप्रः कार्य इत्यत आह—

पुरोहितं च कुर्वीत दैवज्ञमुदितोदितम् ॥

दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ॥ ३१३ ॥

पुरोहितं सर्वत्र दृष्टाऽदृष्टे च कार्ये पुरतो निहितं दानसत्कारादिभिरात्मीयं कुर्वीत । कीदृशं दैवज्ञं ग्रहोत्पाततच्छमनादेर्ज्ञातारं, उदितैः शास्त्रोक्तैरध्ययनानुष्ठानादिभिरुदितमभ्युदयशालिनं, दण्डनीत्यामर्थशास्त्रेऽथर्वाङ्गिरसेऽभिचारशान्तिकप्रधानेऽथर्वभागविशेषे च कुशलं निपुणम् । तथाशब्देन त्रयीसमुच्चयः । प्रथमचकारेण मन्त्रियुक्तस्य गुणस्य शुचित्वस्य, द्वितीयचकारेणाऽऽन्वीक्षिक्याः समुच्चयः ॥ ३१३ ॥

(मिता०) कीदृशं पुरोहितं कुर्यादित्याह—

पुरोहितमिति । पुरोहितं च सर्वेषु दृष्टादृष्टार्थेषु कर्मसु (४) पुरतो निहितं दानमानसत्कारैरात्मसम्बद्धं कुर्यात् । कथम्भूतम्? दैवज्ञं ग्रहो-

(१) हर्षविकारस्थाने विषादरहितान् क० । (२) मौलान् पितृपितामहक्रमेण सेवकान् ।
(३) लब्धलक्षान् लक्ष्यादप्रच्युतशरादीन् । (४) कर्मसु पुरो निहितं क० ।

त्पाततच्छमनादेर्वेदितारम् । उदितोदितं विद्याभिजनानुष्ठानादिभिरुदितैः शास्त्रोक्तैरुदितं समृद्धम् । दण्डनीत्यामर्थशास्त्रे कुशलम् । अथर्वाङ्गिरसे च शान्त्यादिकर्मणि ॥ ३१३ ॥

(वी० मि०) किञ्च—

श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः ॥
यज्ञांश्चैव प्रकुर्वीत विधिवद् भूरिदक्षिणान् ॥ ३१४ ॥

श्रौ(१)त्यग्निहोत्रादिका, स्मार्ता महादानादिरूपा क्रिया तदर्थमृत्विजो वृणुयात् । वरणेन ऋत्विगाख्यसंस्कारयुक्तान् विप्रान् कुर्यात् । एवकारेण ऋत्विग्वरणस्याऽऽवश्यकत्वं, चकारेण पूर्वोक्तपुरोहितस्य वरणं समुच्चीयत इत्याहुः । ऋत्विग्वरणस्य प्रयोजनमाह यज्ञानिति । भूरिदाक्षणान् स्वशक्त्यनुसारिदक्षिणायुक्तान् । एवकारोऽत्र विधिवदित्यत्रान्वेति ।

अन्नहीनो दहेद्राष्ट्रं विधिहीनस्तु ऋत्विजः ।
यजमानमदाक्षिण्यो नास्ति यज्ञसमो रिपुः ॥

इति वचनात् । यज्ञान् यागाङ्गक्रियान् । चकारेण पशुयागपरिग्रहः ॥ ३१४ ॥

(मिता०) श्रौतेति । श्रौतमग्निहोत्रादि । स्मार्तमौपासनादि । तत्क्रियाहेतोर्यागाऽनुष्ठानसिद्ध्यर्थम् । ऋत्विजो वृणुयात् । यज्ञांश्च राजसूयादीन्विधिवद्यथाविधानं भूरिदक्षिणान्बहुदक्षिणानेव कुर्यात् ॥ ३१४ ॥

(वी० मि०) अपि च—

भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च ॥
अक्षयोऽयं निधी राज्ञां यद्विप्रेषूपपादितम् ॥ ३१५ ॥

भोगान् भोग्यान् । गृहशय्यादीन् । वसूनि हिरण्यादीनि । चकाराभ्यामौषधाभययोः परिग्रहः । अत्रहेतुमाह विप्रेषु यदुपपादितं प्रतिपादितं गृहादि । अयमक्षयो राज्ञां निधिरभिलषितार्थदानायत्त इत्यर्थः ॥ ३१५ ॥

(मिता०) किञ्च—

भोगांश्चेति । ब्राह्मणेभ्यो भोगान् सुखानि तत्साधनद्वारेण दद्यात् ।

(१) श्रौतीत्यारभ्य संस्कारयुक्तानित्यन्तं नास्ति ख० पुस्तके ।

वसूनि च सुवर्णरूप्यभूप्रभृतीनि विविधानि नानाप्रकाराणि । यस्मादेष राज्ञामक्षयो निधिः शेवधिर्यद्ब्राह्मणेभ्यो दीयते । साधारणधर्मत्वेन दानप्राप्ता सत्यां राज्ञां दानप्राधान्यप्रतिपादनार्थं पुनर्वचनम् ॥३१५॥

(वी० मि०) हेत्वन्तरमाह—

अस्कन्नमव्ययं(१)चैव प्रायश्चित्तैरदूषितम् ॥
अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते ॥ ३१६ ॥

अग्नेः सकाशादग्निसाध्याद्राजसूयादौ हुताद्धविषो विप्ररूपेऽग्नौ हुतं श्रेष्ठमिह धर्मशास्त्रे उच्यते । श्रेष्ठत्वे हेतुः—अस्कन्नं क्षरणरहितं, अव्ययमप(२)शुष्यमाणं, अव्यथमिति पाठे प्राणिहिंसाशून्यमित्यर्थः । प्रायश्चित्तैः प्रायश्चित्ताचरणक्लेशैरदूषितम् ॥ ३१६ ॥

(मिता०) किञ्च—

अस्कन्नमिति । अग्नेः सकाशादग्निसाध्याद् भूरिदक्षिणाद्राजसूयादेरपि विप्राग्नौ हुतं श्रेष्ठमिहोच्यते । एतदस्कन्नं क्षरणरहितं अ(३)व्यथं पशुहिंसारहितं प्रायश्चित्तैरदूषितं प्रायश्चि(४)त्तरहितम् ॥ ३१६ ॥

(वी० मि०) ब्राह्मणसम्प्रदानस्य चरमफलत्वमभिदधान एव न्यायोपार्जितधनस्य दानाङ्गत्वमाह—

धर्मेण लब्धु(५)मीहेत लब्धं यत्नेन पालयेत् ॥
पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत् ॥ ३१७ ॥

धर्मेण धर्मोपायेन धनं लब्धुं स्वीकर्तुमीहेत चेष्टेत । लब्धं च धनं यत्नेन तत्परतया पालयेत् । पालितं च धनं नीत्या नीत्यनुसारिशास्त्राविरुद्धधनवर्धनोपायेन वर्धयेत् । एवं वृद्धिप्राप्तं धनं पात्रेषु ब्राह्मणेषु निक्षिपेत् दद्यादित्यर्थः ॥ ३१७ ॥

(मिता०) वसूनि विप्रेभ्यो दद्यादित्युक्तं, कया परिपाट्या दद्यादित्याह—

अलब्धमिति । अलब्धलाभाय धर्मशास्त्रानुसारेण यतेत । यत्नेन लब्धं तत्परिपालयेत् स्वयमवेक्षया रक्षेत् । पालितं तत्परतया र-

(१) अस्कन्नमव्ययं—इति मुद्रितपुस्तके पाठः ।
(२) अशुष्यमाणं—इति ख० पु० पाठः ।
(३) अव्ययं ख० । (४) प्रायश्चित्तायासारहितं ख० ।
(५) अलब्धमीहेद्धर्मेण—इति मुद्रितपुस्तके पाठः ।

क्षितं नीत्वा वणि(१)क्पथादिकया वृद्धिं नयेत्। वृद्धं च पात्रेषु त्रिविधेषु धर्मार्थकामयुक्तेषु निक्षिपेद्दद्यात्॥ ३१७॥

(वी० मि०) तत्र भूमिदाने तत्प्रसङ्गान्निबन्धप्रकरणे च विशेषमाह–

दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यं तु कारयेत्॥
आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः॥ ३१८॥
पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिन्हितम्॥
अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः॥ ३१९॥
प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम्॥
स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरम्॥ ३२०॥

भूमिं ब्राह्मणादिभ्यो दत्त्वा निबन्धं अस्यां भूमावियान् करो ग्राह्य इत्यादिव्यवस्थां च कृत्वा आगामिनां भविष्यतां भद्राणां समीचीनानां नृपतीनां परिज्ञानाय लेख्यं दानादिप्रतिपादक(२)लिपिरूपं कारयेत्। कथं कारयेदित्यत आह पट इत्यादि। पटे वस्त्रे ताम्रपट्टे वा ताम्रफलके स्वमुद्रया स्वासाधारणचिन्हेन उपरि लिखिताक्षराणां मूर्द्धभागे चिन्हितं शासनं दानाद्याज्ञाप्रतिपादकं लेख्यमात्मनो वंश्यानात्मानं च प्रतिग्रहस्य प्रतिग्राह्याया भूमेः परीमाणं, दानस्य दत्तभूमेः छेदे आच्छिद्य ग्रहणे उपवर्णनम्—

षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः।
आच्छेत्ता वाऽनुमन्ता च तान्येव नरके वसेत्॥

इत्यादिफलप्रतिपादकं वाक्यं अभिलेख्य स्वहस्तचिन्हेन दानकाललिखनेन च सम्पन्नमत एव स्थिरं अप्रामाण्यशङ्कानास्कन्दनीयं महीपतिः कारयेत्। तुशब्देनाऽन्यत्र दाने लेख्यावश्यकत्वं व्यवच्छिद्यते। आत्मानं चेति चकारेण प्रतिग्रहीतृसमुच्चयः॥३१८–३२०॥

(मिता०) पात्रे निक्षिप्य किं कुर्यादित्याह—

दत्त्वेति। यथोक्तविधिना भूमिं दत्त्वा स्वत्वनिवृत्तिं कृत्वा निब(३)न्धं वा एकस्य भाण्डभरकस्येयन्तो रूपकाः, एकस्य पर्णभरक-

(१) वाणिज्यादिकया ग०। (२) प्रतिबन्धकलिपिरूपं-इति क० पु० पाठः।

(३) अस्मिन्ग्रामे प्रतिक्षेत्रं क्षेत्रस्वामिनैतद्धनमस्मै प्रत्यब्दं प्रतिमासं वा देयमित्येवमादिनियमो निबन्ध अपरार्कः।

स्येयन्ति पर्णानीति वा निबन्धं कृत्वा लेख्यं कारयेत्। किमर्थम्। आगामिनः एष्यन्तो ये भद्राः साधवो नृपतयो भूपास्तेषामनेन दत्तमनेन प्रतिगृहीतमिति परिज्ञानाय। पार्थिवो भूपतिः। अनेन भूपतेरेव भूमिदाने निबन्धदाने वाऽधिकारो न भागपतेरिति दर्शितम् ॥ ३१८ ॥

[मिता०] लेख्यं कारयेदित्युक्तं कथं कारयेदित्याह–

पटे इति। प्रतिग्रहपरीमाणमिति च। कार्पासिके पटे ताम्रपट्टे [१]फलके वा आत्मनो वंश्यान्प्रपितामहपितामहपितॄन्। बहुवचनस्यार्थवत्त्वाय वंशवीर्यश्रुतादिगुणोपवर्णनपूर्वकमभिलेख्य आत्मानं च शब्दात्प्रतिग्रहीतारं प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं चाभिलेख्य। प्रतिगृह्यत इति प्रतिग्रहो निबन्धस्तस्य रूपकादिपरिमाणम्। दीयत इति दान क्षेत्रादि, तस्य छेदः छिद्यतेऽनेनेति छेदः, [२]नद्यावाटौ नि(३)वर्तनं तत्परिमाणं च तस्योपवर्णनं, अमुकनद्या दक्षिणतोऽयं ग्रामः क्षेत्रं वा, पूर्वतोऽमुकग्रामस्यैतावन्निवर्तनमित्यादिनिवर्तनपरिमाणं च लेख्यम्। एवं आवाटस्य नदीनगरवर्त्मादेः संचारित्वेन भूमेर्न्यूनाधिकभावसंभवात्तन्निवृत्त्यर्थम्, स्वहस्तेन स्वहस्तलिखितेन मतं मे अमुकनाम्नः अमुकपुत्रस्य यदत्रोपरि लेखितमित्यनेन संपन्नं युक्तं, कालेन च द्विविधेन शकनृपातीतरूपेण संवत्सररूपेण च कालेन चन्द्रसूर्योपरागादिना संपन्नं स्वमुद्रया गरुडवाराहादिरूपयोपरि बहिश्चिह्नितमङ्कितं स्थिरं दृढं शासनं शि(४)ष्यन्ते भविष्यन्तो नृपतयोऽनेन दानाच्छ्रेयोऽनुपालनमिति शासनं कारयेत्। महीपतिर्न भोगपतिः। सन्धिविग्रहादिकारिणा न(५) येन केनचित्। 'सन्धिविग्रहकारी तु भवेद्यस्तस्य लेखकः। स्वयं राज्ञा समादिष्टः स लिखेद्राजशासनम्' ॥ इति स्मरणात्। दानमात्रेणैव दानफले सिद्धे शासनकरणं तत्रैव भोगाभिवृद्ध्या फलातिशयार्थम् ॥ ३१९—३२० ॥

(वी० मि०) राज्य आवश्यकप्रजापरिपालनाद्युपयोगीनि कृत्यान्तराण्याह—

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ॥

---

(१) ताम्रफलके वा० ग०। (२) नद्याघाटौ ग०। (३) निवर्तनपरिमाणं च क०।
(४) शास्यन्ते ग०। (५) नान्येन ग०।

तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ॥ ३२१ ॥

रम्यं रमणीयं पशव्यं पशुभ्यो हितं आजीव्यं कन्दमूलफलाद्यर्थं प्रजादिभिरुपजीवनीयं जाङ्गलं सजलतरुपर्वतं उच्चप्रायमिति केचित्। एतादृशं देशमावसेत् तादृशे देशे वसेदित्यर्थः। "उपाऽन्वध्याङ्वसः" (पा० सू० १।४।४८) इति सप्तम्यर्थे द्वितीया। तत्र तादृशदेशे जनानां स्वराष्ट्रवासिनां कोशस्य सुवर्णादेः आत्मनश्च रक्षार्थं दुर्गाणि कुर्वीत। दुर्गाण्याह मनुः—

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च।
नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरम् ॥

एतेन दुर्गरूपं राज्याङ्गं दर्शितम् ॥ ३२१ ॥

(मिता०) इदानीं राज्ञो निवासस्थानमाह—

रम्यमिति। रम्यं रमणीयं अशोकचम्पकादिभिः। पशव्यं पशुभ्यो हितं पशुवृद्धिकरम्। आजीव्यमुपजीव्यं कन्दमूलपुष्पफलादिभिः। जाङ्गलं यद्यप्यल्पोदकतरुपर्वतोदेशो जाङ्गलस्तथाप्यत्र स(१)माधिकजलतरुपर्वतो देशो जाङ्गलशब्देनाऽभिधीयते तं देशमावसेदधिवसेत्। तत्रैवंविधे देशे जनानां कोशस्य सुवर्णादेरात्मनश्च रक्षणार्थं दुर्गं कुर्वीत। तच्च षड्विधम्। यथाह मनुः (७।७०)—'ध(२)न्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा। नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्' ॥ इति ॥ ३२१ ॥

(वी० मि०) किञ्च—

तत्र तत्र च निष्णातानध्यक्षान् कुशलान् शुचीन् ॥
प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान् ॥ ३२२ ॥

तत्र तत्र धर्मकोशहस्त्यश्वादिस्थानान्तःपुरादिषु अध्यक्षान्

---

(१) समजङ्ग क०।

(२) धन्वदुर्गं असंवेष्टितं चतुर्दिशं पञ्चयोजनमनुदकम्। महीदुर्गं पाषाणेष्टकायुतद्वादशहस्तोच्छ्रितेन युद्धार्थमुपरिभ्रमणयोग्येन सावरणगवाक्षादियुक्तेन प्राकारेण समन्ताद्वेष्टितं सद्वारम्। जलदुर्गमगाधोदकेन समन्ततो वेष्टितम्। वार्क्षं बहिः सर्वतो योजनमात्रं व्याप्य तिष्ठन्महावृक्षकण्टकिगुल्मलतायाचितम्। नृदुर्गं चतुर्दिगवस्थायिहस्त्यश्वरथयुक्तबहुपादातरक्षितम्। गिरिदुर्गं सर्वतः पृष्ठमतिदुरारोहं संकोचैकमार्गोपेतं अन्तर्नदीप्रस्रवणाद्युदकयुक्तं बहुसस्योत्पन्नक्षेत्रवृक्षान्वितम्।

अधिकारिणः प्रकुर्यान्नियुञ्जीत । यदा(१)हुः—

धर्मकृत्येषु धर्मज्ञानर्थकृत्येषु पण्डितान् ।
क्लीबान् स्त्रीषु नियुञ्जीत नीचान्नीचेषु धर्मवित् ॥

कीदृशान् निष्णातान् अनन्यव्यापारान् । कुशलान् तत्तद्व्यापारचतुरान् । शुचीन् परद्रव्यग्रहणादिजन्याशौचरहितान् । चकारात् पूर्वोक्तास्थिरत्वसमुच्चयः । आये सुवर्णाद्युत्पादने, कर्मान्ते आरब्धकर्मनिर्वाहे, व्ययकर्मणि आवश्यकदुर्गादिरक्षणोपयोगिधनव्यये च कर्मणि । चकारादायस्थानरक्षणादिके उद्यतानुद्युक्तान् ॥ ३२२ ॥

(मिता०) किंच—

तत्रेति । तत्र तत्र ध(२)र्मार्थकामादिषु अध्यक्षान् योग्यानधिकारिणः प्रकुर्यान्नियुञ्जीत । यथाहुः-'धर्मकृत्येषु धर्मज्ञानर्थकृत्येषु पण्डितान् । स्त्रीषु क्लीबान्नियुञ्जीत नीचान्निन्द्येषु कर्मसु' ॥ इति कीदृशान् निष्णातानन्यव्यापारान् । कुशलान् तत्तद्व्यापारचतुरान् । शुचीन् चतुर्विधोपधाशुद्धान् । आयकर्मसु सुवर्णाद्युत्पत्तिस्थानेषु व्ययकर्मसु सुवर्णादिदानस्थानेषु च उद्यताननलसान् । चशब्दात्प्राज्ञत्वादिगुणयुक्तान् । उक्तं च—'प्राज्ञत्वमुपधाशुद्धिरप्रमादोऽभियुक्तता । कार्येषु व्यसनाभावः स्वामिभक्तिश्च योग्यता' ॥ इति ॥ ३२२ ॥

(वी० मि०) दानान्तराद्रणार्जितधनदानस्य प्रजाभ्योऽभयदानस्य चातिशयमाह—

नाऽतः परतरो धर्मो नृपाणां यद्रणार्जितम् ॥
विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं (३)सदा ॥ ३२३ ॥

रणे युद्धेऽर्जितं यद्द्रव्यं विप्रेभ्यो दीयते यच्च प्रजाभ्यः सदाऽभयं सार्वकालिकमभयं दीयतेऽतः परतर उत्कृष्टो धर्मो नृपाणां नास्तीत्यर्थः । चकारेण रणार्जितशरणागतादिसमुच्चयः ॥ ३२३ ॥

(मिता०) 'भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च' इति सामान्येन स्वस्वदानमुक्तम्, इदानीं नृपाणां विक्रमार्जितस्य दाने फलातिशयमाह—

नात इति । अस्मादुत्कृष्टतरो धर्मो नृपाणां न विद्यते यद्रणार्जितं

(१) तथा—इति क० पु० पाठः ।
(२) धर्मादिस्थ्यादिषु ग० ।
(३) तथा—इति क० पु० पाठः ।

द्रव्यं विप्रेभ्यो दीयते । यच्च प्रजाभ्योऽभयदानम् ॥ ३२३ ॥

(वी० मि०) रणार्जितदानमुक्तं, तन्न युक्तं 'न संशय प्रपद्येते'-त्यादिवचने रणस्याऽकर्तव्यत्वप्रतिपादनादित्याशङ्कायां शास्त्राननु-मतसाहसपरमेवाऽकर्तव्यत्वप्रतिपादनमित्यभिप्रेत्याह—

य आहवेषु वध्यन्ते भूम्यर्थमपराजिताः(१) ॥
अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा ॥ ३२४ ॥
पदानि क्रतुतुल्यानि भग्नेष्वप्यनिवर्तिनाम्(२) ॥
राजा सुकृतमादत्ते हतानां विपलायिनाम् ॥ ३२५ ॥

अपराजिता अपराङ्मुखा भूम्यर्थमाहवेषु अकूटैरविषादिग्धैरा-युधैः क्रियमाणेषु वध्यन्ते ते योगिनो योगाभ्यासरता इव स्वर्गं यान्ति । योगिनां च स्वर्ग उक्तो भगवद्गीतायाम्—

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥

इति । भग्नेषु पराभूतेषु स्वसैन्येषु अनिवर्तिनां अपराङ्मुखानां यदा नियुद्धे दीयमानानि प्रत्येकमश्वमेधतुल्यानीत्यर्थः । विनिवर्ति-नामिति पाठे भग्नसैन्याद्विनिवर्ततामित्यर्थः । राज्ञा युद्धे पलायनं न कर्तव्यमित्यभिप्रेत्य पलायिनां दोषमाह राजा सुकृतमिति । हतानां युद्धे शास्त्रादिपीडितानामत एव विपलायिनां सुकृतं राजा प्रतिपक्ष आदत्ते पलायिनां सुकृतं नश्यतीत्यर्थः ॥ ३२४-३२५ ॥

(मिता०) रणार्जितं द्रव्यं देयमित्युक्तं, द्रव्यार्जनाय रणे प्रवृत्त-स्य विपत्तिरपि सम्भवतीति न धर्मो नाप्यर्थ इति ततो निवृत्तिरेव श्रे(३)यसीत्यत आह—

य इति । ये भूम्याद्यर्थमाहवेषु प्रवृत्ता अपराङ्मुखा अभिमुखा वध्यन्ते मार्यन्ते ते स्वर्गं यान्ति । योगाभ्यासरता यथा । यद्यकूटैर-विषदिग्धादिभिरायुधैर्योद्धारो भवन्ति ॥ ३२४ ॥

(मिता०) किञ्च—

पदानीति । स्वबलेषु करितुरगरथपदातिषु भग्नेष्वविनिवर्तिनां

(१) भूम्यर्थमपराङ्मुखाः—इति मुद्रितपुस्तके पाठः ।
(२) भग्नेष्वविनिवर्तिनाम्—इति ,, ,, ,, ।
(३) ज्यायसी ग० ।

परबलाभिमुखयायिनां पदानि क्रतुतुल्यान्यश्वमेधतुल्यानि । विपर्यये दोषमाह-विपलायिनां पराङ्मुखानां हतानां राजा सुकृतमादत्ते ॥३२५॥

(वी० मि०) राज्ञो युद्धे धर्मान्तरमाह—

तवाहंवादिनं क्लीबं निर्हेतिं परसङ्गतम् ॥
न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकम् ॥ ३२६ ॥

तवाऽहमिति वादिनं, क्लीबं नपुंसकं, निर्हेतिं निरायुधं, परसङ्गतमन्येन सह युद्ध्यमानं, विनिवृत्तं आरब्धयुद्धात्, युद्धप्रेक्षणकं युद्धदर्शनमात्रपरं, आदिपदेन दन्ततृणग्राहिपरिग्रहः । कः स्वार्थे । चकारो व्यश्वसारथ्यादिपरिग्रहार्थः । तदाह गौतमः—'न दोषो हिंसायामाहवेऽन्यत्र व्यश्वसारथ्यनायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षाधिरूढदूतगोब्राह्मणवादिभ्यः'। शङ्खः—'न पानीयं पिबन्तं न भुञ्जानं नोपानहौ मुञ्चन्तं नावर्माणं सवर्मा न स्त्रियं न करेणुं न वाजिनं न सारथिनं न दूतं न ब्राह्मणं न राजानमराजा हन्यात्'॥३२६॥

(मिता०) अपि च—

तवेति । तवाहमिति यो वदति तं, क्लीबं नपुंसकं, निर्हेतिं निरायुधं परसङ्गतमन्येन सह युध्यमानं विनिवृत्तं युद्धाद्विनिवृत्तं युद्धप्रेक्षणकं युद्धदर्शिनं न हन्यादिति सर्वत्र सम्बन्धः । आदिग्रहणादश्वसारथ्यादीनां ग्रहणम् । यथाह गौतमः—'न दोषो हिंसायामाहवेऽन्यत्र अश्वसारथ्यनायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढोन्मत्तदूतगोब्राह्मणादिभ्यः' इति । शङ्खोऽप्याह—'न पानीयं पिबन्तं न भुञ्जानं नोपानहौ मुञ्चतं नावर्माणं सवर्मा न स्त्रियं न करेणुं न वाजिनं न सारथिनं न सूतं न दूतं न ब्राह्मणं न राजानमराजा हन्यात्' इति ॥ ३२६ ॥

(वी० मि०) एकपूर्वाह्णकृत्यमारभ्याऽपरपूर्वाह्णकृत्यपर्यन्तं राज्ञ आह सप्तभिः—

कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम् ॥
व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुञ्जीत कामतः ॥ ३२७ ॥

कृता रक्षा रक्षणोपायो दैवमानुषभेदेन द्विविधो येन स कृतरक्षः । समुत्थाय सावधनीभूय । स्वयमायव्ययौ पश्येत् । ततो व्यव-

हारान्। अग्रे वक्ष्यमाणान् भाषोत्तरादिरूपचतुष्पादान् जयभङ्गपर्यन्तान्। दृष्ट्वाऽवधार्य मध्यन्दिने स्नात्वा कामतो यथारुचि निषिद्धवर्जं भुञ्जीत ॥ ३२७ ॥

(मिता०) कृतरक्ष इति। कृतरक्षः पुरस्यात्मनश्च रक्षां विधाय प्रतिदिनं प्रातःकाल उत्थाय स्वयमेवायव्ययौ पश्येत्। ततो व्यवहारान् दृष्ट्वा मध्याह्नकाले स्नात्वा कामतो यथाकालं(१) भुञ्जीत ॥ ३२७ ॥

(२)हिरण्यव्यापृतानीतं (३)भाण्डागारे क्षिपेत्ततः ॥
पश्येच्चारांस्ततो दूतान् प्रेषयेन्मन्त्रिसङ्गतः॥ ३२८ ॥

(वी० मि०) ततो व्यापृतैरधिकारिभिरानीतं हिरण्यादिकं भाण्डागारे कोशस्थाने निदध्यात् स्वयमाधिकारिद्वारा वा यथौचित्यम्। एतेन कोशाख्यं राज्याङ्गं दर्शितम्। ततश्चारान् प्रच्छन्नान्वार्ताहरान् प्रत्यागतान् पश्येत। तदुक्तमवगच्छेदिति यावत्। ततो मन्त्रिसङ्गतः सन् दूतान् चारोक्तशत्रुबलाबलानुसारेण सन्धिविग्रहादिसन्देशहरान् गूढान् प्रेषयेत्। दूतानिति बहुवचनं निसृष्टार्थसन्दिष्टार्थशासनहस्तभेदेन त्रिविधत्वं दूतानां दर्शयितुम्। तत्र स्वयमेव राजकार्याणि देशकालोचितानि योऽभिधत्ते स निसृष्टार्थः। वाचिकं परस्मै यो निवेदयेति स सन्दिष्टार्थः। राजलेख्यं यः प्रापयति स शासनहस्त इति ॥ ३२८ ॥

(मिता०) हिरण्येति। तदनन्तरं हिर(४)ण्यव्यापृतैर्हिरण्याद्यानयननियुक्तैरानीतं स्वयमेव निरीक्ष्य भाण्डागारेषु निक्षिपेत्। ततश्चा(५)रान्स्पशान्प्रत्यागतान्पश्येत्। ये परराज्ये वृत्तान्तपरिज्ञानाय परिव्राजकतापसादिरूपेण गूढचारिणः प्रेषितास्तांश्चारान्दृष्ट्वा कचिन्निवेशयेत्। दूताश्च ये प्रकटमेव राजान्तरं प्रति गतागतमाचरन्ति। ते च त्रिविधाः निसृष्टार्थाः सन्दिष्टार्थाः शासन(६)हराश्चेति। तत्र निसृष्टार्था राजकार्याणि देशकालोचितानि स्वयमेव कथयितुं क्षमाः। उक्तमात्रं ये परस्मै निवेदयन्ति ते सन्दिष्टार्थाः। शासनहरास्तु राज-

(१) यथारुचि-इति क्वाचित्क उत्तमः पाठः।
(२) हिरण्यं व्यापृतानीतं—इति पाठः सर्वत्र।
(३) भाण्डागारेषु निक्षिपेत्—इति मुद्रितपुस्तके पाठः।
(४) हिरण्यादिक ख.। (५) श्चारान्विश्वस्तान् ख.।
(६) शासनहस्ताश्चेति क.।

लेखहारिणः तान्पूर्वप्रेषितानागतान्मन्त्रिसङ्गतः पश्येत् । दृष्ट्वा तद्वार्तामाकलय्य पुनः पुनः प्रेषयेत् ॥ ३२८ ॥

ततः स्वैरविहारी स्यान्मन्त्रिभिर्वा समागतः ॥
बलानां दर्शनं कृत्वा सेनान्या सह चिन्तयेत् ॥ ३२९ ॥

(वी० मि०) ततोऽपराह्णे स्वैरं यथेष्टं विहारी अन्तःपुरस्त्रीभिस्सह एकाकी क्रीडायुक्तः स्यात् । अथवा मन्त्रिभिर्विश्वासास्पदैर्नर्मसचिवैः समन्वितः सन् विहारी स्यात् । ततश्च बलानां हस्त्यश्वादीनां दर्शनं कृत्वा सेनान्या सेनाध्यक्षेण सह बलरक्षणादिदेशकालोचितं चिन्तयेत् । यदाह मनुः—

भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य च यथाकामं पुनः कार्याणि चिन्तयेत् ॥

इति । एतेन दण्डपदेनाग्रे वक्ष्यमाणं बलरूपं राज्याङ्गं दर्शितम् ॥ ३२९ ॥

(मिता०) तत इति । तदनन्तरमपराह्णे स्वैरं यथेष्टमेकोऽन्तःपुरविहारी स्यात् । मन्त्रिभिर्वा विश्वासिभिः कलाकुशलैः परिहासवेदिभिः परिवृतः स्त्रीभिश्च रूपयौवनवैदग्ध्यशालिनीभिः । 'भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह । विहृत्य तु यथाकामं पुनः कार्याणि चिन्तयेत्' ॥ इति (७।२२१) मनुस्मरणात् । ततो विशिष्टैर्वस्त्रकुसुमविलेपनालङ्कारैरलङ्कृतः हस्त्यश्वरथपदातिबलानि दृष्ट्वा सेनान्या सेनापतिना सह तद्रक्षणादि देशकालोचितं चिन्तयेत् ॥३२९॥

सन्ध्यामुपास्य शृणुयाच्चाराणां गूढभाषितम् ॥
गीतनृत्यैश्च भुञ्जीत पठेत्स्वाध्यायमेव च ॥ ३३० ॥

(वी० मि०) सायंसन्ध्यामुपास्याऽपराह्णाऽनन्तरमागतानां चाराणां रहस्यभाषितं शृणुयात् । ततो गीतनृत्यक्रीडनैरुपलक्षितोऽनन्तरं भुञ्जीत । स्वाध्यायं वेदमभ्यासार्थमेवपठेदित्यर्थः । चकारेण वाद्यश्रवणपरिग्रहः ॥ ३३० ॥

(मिता०) सन्ध्यामिति । ततः सायङ्काले सन्ध्यामुपास्य । सामान्येन प्राप्तस्यापि पुनर्वचनं कार्याकुलत्वादविस्मरणार्थम् । अनन्तरं ये पूर्वदृष्टाः क्वचित्स्थाने निवेशितास्तेषां चाराणां गूढभाषितमन्तर्वेश्मनि शस्त्रपाणिः शृणुयात् । उक्तं च मनुना (८।२२३)—'स-

न्ध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत्। रहस्याख्यायिनां चैव प्राणिधीनां च चेष्टितम्' ॥ इति। ततो नृत्यगीतादिभिः कंचित्कालं क्रीडित्वा कक्षान्तरं प्रविश्य भुञ्जीत। 'गत्वा कक्षान्तरं त्वन्यत्समनुज्ञाप्य तं जनम्। प्रविशेद्भोजनार्थं च स्त्रीभिरन्तःपुरं सह' ॥ इति (मनुः ८।२२४) स्मरणात्। ततोऽविस्मरणार्थं यथाशक्ति स्वाध्यायं पठेत् ॥ ३३० ॥

संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च ॥

शास्त्राणि चिन्तयेद् बुध्या सर्वकर्तव्यतां (१)तथा ॥३३१॥

(वी० मि०) तूर्यघोषेण वादित्रशब्देनोपलक्षितः शयीत। तथैव तूर्यघोषेणैव प्रतिबुध्येत् जागृयात्। चकाराद्बन्दिमागधस्तुत्यादिभिः प्रतिबुद्धयेच्च। स्वबुद्धया शास्त्राणि। तथा शास्त्रानुसारेण सर्वं च कर्तव्यसमुदायं च चिन्तयेत् विचारयेत् ॥ ३३१ ॥

(मिता०) संविशेदिति। तदनन्तरं तूर्यशङ्खघोषेण संविशेत्स्वप्यात्। तथैव तूर्यादिघोषेण प्रतिबुध्येत्। प्रतिबुद्ध्य च शास्त्रविद्भिर्विश्वासिभिः सह एकाकी वा पश्चिमे यामे शास्त्राणि चिन्तयेत्। सर्वकर्तव्यताश्च सर्वकार्याणि च। एतच्च स्वस्थं प्रत्युच्यते। अस्वस्थः पुनः सर्वकार्येष्वन्यं नियोजयेत्। यथाह मनुः—'एतद्वृत्तं समातिष्ठेदरोगः पृथिवीपतिः। अस्वस्थः सर्वमेवैतन्मान्त्रिमुख्ये निवेशयेत्' ॥ इति ॥ ३३१ ॥

प्रेषयेच्च ततश्चारान् स्वेष्वन्येषु च सादरम्(२) ॥

(वी० मि०) ततस्तत्रस्थ एव स्वेष्वन्तःपुरादिषु अन्येषु परराष्ट्रेषु चारान् सादरं दानमानादिपुरस्सारं यथास्यात्तथा प्रेषयेत्। चकाराभ्यामावश्यकश्रौतस्मार्तयोरग्निहोत्रादिसन्ध्यावन्दनाद्योः परिग्रहः ॥

(वी० मि०) ततः—

ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनन्दितः ॥३३२॥

दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां काञ्चनं महीम् ॥

नैवेशिकानि च (३)तथा श्रोत्रियेभ्यो (४)गृहाणि च॥३३३॥

---

(१) कर्तव्यतां यथा—इति ख० पुस्तके, कर्तव्यतास्तथा—इति मुद्रितपुस्तके पाठः।

(२) सादरान्—इति मुद्रितपुस्तके पाठः। (३) ततः—इति मुद्रितपुस्तके पाठः।

(४) श्रोत्रियाणां—इति क० ख० पुस्तकयोः पाठः।

ऋत्विगादय उक्तास्तैराशीर्भिरभिनन्दितः संवर्धितो, ज्योतिर्विदो ज्योतिषिकान् वैद्यान् भिषजः दृष्ट्वा तैः सह ग्रहादेः शरीरस्य स्थितिं ज्ञात्वेति यावत् । अर्थाद्ग्रहशान्त्याद्युपयोगीनि ग्रहयागादीनि शरीरस्थित्युपयोगीनि भेषजादीनि च पुरोहितादिभ्य आदिश्य श्रोत्रियेभ्यः गां काञ्चनं भूमिं विवाहोपकरणानि कन्यालङ्कारादीनि गृहाणि च दद्यात् । आद्यचकारेणोपनयनाद्युपयोगिवस्तूनां तथाशब्देन श्रोत्रियभिन्नानामपि ब्राह्मणानां सङ्ग्रहः । द्वितीयचकारेण ग्रहोपकरणसमुच्चयः । एतानि च कर्माणि प्रत्यहकृत्यानि शक्तौ स्वयमेव कुर्वीत । असम्भवे तु कानिचिद्योग्यब्राह्मणद्वारा सम्पाद्यानि । यदाहुः—

> एतद् वृत्तं समातिष्ठेदरोगः पृथिवीपतिः ।
> अस्वस्थः सर्वमेतच्च मन्त्रिमुख्ये नियोजयेत् ॥

इति ॥ ३३२-३३३ ॥

(मिता०) प्रेषयेदिति । दृष्ट्वेति च । अनन्तरं तत्रस्थ एव विश्वस्तान् चारान् दानमानसत्कारैः पूजितान्स्वेषु सामन्ताद्यधिकारिषु अन्येषु च महीपतिषु प्रेषयेत्तच्चिकीर्षितपरिज्ञानाय । ततः प्रातःसन्ध्यामुपास्याग्निहोत्रं हुत्वा पुरोहितर्त्विगाचार्यादिभिराशीर्भिरभिनन्दितो ज्योतिर्विदो दृष्ट्वा तेभ्यश्च ग्रहादिस्थितिं विदित्वा शान्तिकादीनि च पुरोहितायादिश्य(१) वैद्यांश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं निवेद्य प्रतिविधानं चादिश्य गां दोग्ध्रीं काञ्चनं महीं च नैवेशिकानि विवाहोपयोगीनि कन्यालंकारादीनि गृहाणि च सुधाधवलितादीनि श्रोत्रियेभ्योऽधीतवेदेभ्यो ब्राह्मणेभ्यो दद्यादिति प्रत्येकं सम्बध्यते ॥३३२-३३३॥

(वी० मि०) राज्ञः सर्वाधिकं धर्मान्तरमाह—

> **ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोऽरिषु ॥**
> **स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥ ३३४ ॥**

राजा ब्राह्मणेषु कृतापराधेष्वपि क्षमावान्, स्निग्धेषु मित्रज्ञात्यादिषु अजिह्मोऽकुटिलः, अरिषु क्रोधनः क्रोधशीलः, भृत्यवर्गेषु पुत्रसेवकादिषु, प्रजासु पौरादिषु चकारात् शरणागतेषु पितेव पालनविनयाधानादिकारी स्यादित्यर्थः ॥ ३३४ ॥

---

(१) पुरोहितातानदिश्य-इ मुद्रितपुस्तके पाठः ।

(मिता०) किंच—

ब्राह्मणेष्विति । ब्राह्मणेष्वधिक्षिपत्स्वपि क्षमी क्षमावान् स्निग्धेषु स्नेहवत्सु मित्रादिष्वजिह्मः अवक्रः । अरिषु क्रोधनः । भृत्यवर्गेषु प्रजासु च हिताचरणेनाहितनिवर्तनेन च पितेव दयावान् । स्यादिति प्रत्येकं सम्बन्ध्यते ॥ ३३४ ॥

(वी० मि०) प्रजापालनस्य राजधर्मेषु प्राधान्यं दर्शयितुमुक्त एव प्रजापालने फलातिशयमाह—

पुण्यात् षड्भागमादत्ते न्यायेन परिपालयन् ॥
सर्वदानाधिकं यस्मात् प्रजानां परिपालनम् ॥३३५॥
चाटतस्करदुर्वृत्तमहासाहसिकादिभिः ॥
पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः ॥ ३३६ ॥

राजा न्यायेन शास्त्रानुमतवर्त्मना प्रजाः परि सर्वतोभावे हिताचरणेनाऽनिष्टवारणेन च पालयन् कृतात् पुण्यात् षड्भागं षष्ठमंशमादत्ते प्राप्नोति । यतः यतश्च प्रजानां परिपालनं सर्वदानेभ्यस्तुलापुरुषदानादिभ्योऽधिकमधिकफलप्रदं, तस्माच्चाटादिभिर्विशेषतश्च राजाधिकृतैर्लेखकैः कायस्थैः पीड्यमानाः प्रजा रक्षेत्पीडारहिताः कुर्वीत । चाटाः वञ्चनेन परधनग्राहिणः, तस्कराः चौराः, दुर्वृत्ता द्यूतकारिप्रभृतयः, महासाहसिकाः परप्राणोपरोधिसाहसकारिणः । आदिपदेन 'उत्कोचकाश्चोपधिका' इति मनूक्तादीनां सङ्ग्रहः । चकाराद्गणनाधिकृतसमुच्चयः । एतेन जनपदेन वक्ष्यमाणं राष्ट्ररूपं राज्याङ्गं दर्शितम् ॥ ३३५–३३६ ॥

(मिता०) प्रजापालनफलमाह—

पुण्यादिति । यस्मान्न्यायेन (१)शास्त्रोक्तमार्गेण प्रजाः परिपालयन् परिपालितप्रजोपचितपुण्यात् षड्भागं षष्ठं भागमादत्ते । यस्माच्च सर्वेभ्यो भूम्यादिदानेभ्यः प्रजानां परिपालनमधिकफलम् । तस्मात्प्रजासु यथा पिता तथैव स्यादिति गतेन सम्बन्धः ॥ ३३५ ॥

(मिता०) चाटेति । चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति । प्रच्छन्नापहारिणस्तस्कराः । दुर्वृत्ता (२)इन्द्रजालिककितवादयः । सहो बलं सहसा बलेन कृतं साहसं महच्च तत्साहसं च

(१) धर्मशास्त्रोक्तेन० ग० । (२) ऐन्द्रजालिक० ग० ।

महासाहसं तेन वर्तन्ते इति महासाहसिकाः प्रसह्या(१)पहारिणः । आदिशब्दान्मौलिककुहकदुर्वृत्ताः । एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत् । कायस्था लेखका गणकाश्च तैः पीड्यमाना विशेषतो रक्षेत् । तेषां राजवल्लभतयाऽतिमायावित्वाच्च दुर्निवारत्वात् ॥ ३३६ ॥

(वी० मि०) प्रजापरिपालनस्याऽकरणे दोषमाह—

अरक्ष्यमाणाः कुर्वन्ति यत्किञ्चित्किल्बिषं प्रजाः ॥
तस्मात्तु नृपतेरर्धं यस्माद् गृह्णात्यसौ करान् ॥ ३३७ ॥

अरक्ष्यमाणाः प्रजा यत्किञ्चिच्चौर्यादिकं किल्बिषं पापं कुर्वन्ति । तस्मात्किल्बिषादर्द्धं किल्बिषं नृपतेर्भवति । पञ्चमी षष्ठ्यर्थे । तुशब्देन पुण्यात् षड्भागो व्यवच्छिद्यते । ननु पुण्यस्य षड्भागं पापस्याऽर्धं नृपतिराप्नोतीति वैषम्यं कृतमित्यत आह—यस्मादसौ राजा रक्षणार्थं करान् गृह्णाति, तस्मादुचितमेवार्द्धपापसङ्क्रमणम् । पुण्ये तु राज्ञः परिपालनरूपव्यापारेऽपि द्रव्यदानाभावात् षड्भागपुण्यसङ्क्रमणमेवेति ॥ ३३७ ॥

(मिता०) अरक्ष्यमाणा इति । अरक्ष्यमाणाः प्रजाः यत्किञ्चित्किल्बिषं चौर्यपरदारगमनादि कुर्वन्ति तस्मात्पापादर्धं नृपतेर्भवति । यस्मादसौ राजा रक्षणार्थं प्रजाभ्यः करान् गृह्णाति ॥ ३३७ ॥

(वी० मि०) किञ्च—

ये राष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम् ॥
साधून् संमानयेद्राजा विपरीतांस्तु घातयेत् ॥३३८॥
उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत् ॥
सद्दानमानसत्कारैः(२) श्रोत्रियान् वासयेत्सदा ॥३३९॥

राष्ट्रे राज्ञः करग्रहणदोषेऽधिकृतास्तेषां चारैर्विविधं सम्यग्वा चेष्टितं ज्ञात्वा साधून् सम्यक् चेष्टायुक्तान् राजा दानसत्कारादिभिः पूजयेत् । विपरीतान् असाधून् घातयेत् हन्यात् । एतच्च वधार्हापराधे । अन्यत्र त्वपराधानुसारेण दण्डयेदिति तात्पर्यम् । अत एव तुशब्दस्तेषां घातनव्यवच्छेदायेति । उक्तं च व्यवहारदर्शनादिकार्येषु न्यायेन धनग्रहणं,तेन जीविनस्तदुपजीविनोऽधिकृतान्

(१) अपकारिणः ग० । (२) सद्दानमानसत्कारात्—इति मुद्रितपुस्तके पाठः ।

सर्वस्वहीनान् कृत्वा प्रवासयेत् स्वराष्ट्रान्निष्कासयेत् । श्रोत्रियान् शाखाध्येतॄन् संमानादिभिः सदा वासयेत्। संमानोऽभ्युत्थानाऽभिवादनानुगमनादिभिः प्रीणनं, सत्कारो यज्ञादौ वरणादिरूपः ३३८-३३९

(मिता०) ये इति। उत्कोचजीविन इति च। राष्ट्रे राजा अधिकारेषु ये नियुक्तास्तेषां विचेष्टितं चरितं चारैरुक्तलक्षणैः सम्यक् ज्ञात्वा साधून्सुचरितान् संमानयेत् दानमानसत्कारैः पूजयेत्। विपरीतान्दुष्टचरितान्सम्यग्विदित्वा घातयेत् अपराधानुसारेण। ये पुनरुत्कोचजीविनस्तान्द्रव्यरहितान्कृत्वा स्वराष्ट्रात्प्रवासयेत्। श्रोत्रियान्सद्दानमानसत्कारैः सहितान्कृत्वा स्वराष्ट्रे स्वदेशे सदैव वासयेत्॥ ३३८-३३९॥

(वी० मि०) अन्यायेन प्रजाभ्यो धनं राजा न गृह्णीयान्न च बन्धनताडनादिना पीडयेदित्यभिप्रेत्याह—

अन्यायेन नृपो राष्ट्रात्स्वकोशं योऽभिवर्धयेत्॥
सोऽचिराद्विगतश्रीको नाशमेति सबान्धवः॥ ३४०॥
प्रजापीडनसन्तापात्समुद्भूतो हुताशनः॥
राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा(१) विनिवर्तते॥ ३४१॥

अन्यायेन अदण्ड्यदण्डनाधिककरग्रहणादिना यो नृपः स्वस्वकोशं धनं वर्धयेत् स शीघ्रं सबान्धवः पुत्रादिसहितो विगतश्रीको भ्रष्टसज्यो भूत्वा नश्यति। प्रजेति। प्रजानां बन्धनताडनादिना पीडनेन यः सन्तापो दुःखं तेन समुद्भूतोऽतिप्रौढः सन्नुत्पन्नो हुताशनः प्रजाक्रोधरूपो नृपाधर्मरूपो वा राज्ञः कुलादीन्यदग्ध्वाऽविनाश्य न विनिवर्तते न शाम्यति॥ ३४०-३४१॥

(मिता०) अन्यायेनेति। योऽसौ राजा स्वराष्ट्रादन्यायेन द्रव्यमादाय स्वकोशं अभिवर्धयेत् सोऽचिराच्छीघ्रमेव विगतश्रीको विनष्टलक्ष्मीको बन्धुभिः सह नाशं प्राप्नोति॥ ३४०॥

(मिता०) प्रजेति। प्रजानां तस्करादिकृतपीडनेन यः सन्तापस्तस्मादुद्भूतो हुताशन इव। सन्तापकारित्वादपुण्यराशिर्हुताशनशब्देनोच्यते। स राज्ञः कुलं श्रियं प्राणांश्चादग्ध्वा नाशमनीत्वा न निवर्तते नोपशाम्यति॥ ३४१॥

(१) प्राणांश्चाऽदग्ध्वा न निवर्तते—इति मुद्रितपुस्तके पाठः।

(वी० मि०) ननु परराष्ट्रप्रजापीडनेऽप्यनिष्टापत्त्या कथं विहितं परराज्योपरोधादिकं घटेतेत्यर्थत आह—

य एव धर्मो(१)नृपतेः स्वराष्ट्रपरिपालने ॥
तमेव कृत्स्नमाप्नोति परराष्ट्रं वशं नयन् ॥ ३४२ ॥

वशं नयन्स्वसात्कुर्वन् । तथा च विहितपरराष्ट्रवशीकरणार्थं तत्प्रजापीडनमपि यागीयपशुहिंसावद्वैधत्वादनिषिद्धमेवेति भावः ३४२

(मिता०) य एवेति । न्यायतः स्वराष्ट्रपरिपालने राज्ञो यो धर्मस्तं सकलं वक्ष्यमाणलक्षणन्यायेन परराष्ट्रं वशं नयन् आत्मसात्कुर्वन्नाप्नोति धर्मषड्भागं च ॥ ३४२ ॥

(वी० मि०) वशीकरणानन्तरन्तु तासां प्रजानां पीडनमवैधत्वाद्धेयमेवेत्याभिप्रायश्चैव वशीकृते राष्ट्रे राजकृत्यमाह—

किन्तु (२)यस्मिन् य आचारो व्यवहारः कुलस्थितिः ॥
तथैव परिपाल्योऽसौ यदा वशमुपागतः ॥ ३४३ ॥

यदासौ परकीयो देशः स्वस्य वशमुपागतस्तदवधि यस्मिन् परदेशे य आचारो मातुलकन्यापरिणयादिस्तद्देशनियतस्तस्मिन्देशे स आचारस्तथैव प्राक्तनतद्देशरीत्यैव परिपाल्यः । यस्मिन्देशे यो व्यवहारः करग्रहणादिरूपः स तत्र तथैव परिपाल्य इति ॥ ३४३ ॥

(मिता०) किञ्च—

यस्मिन्निति । यदा परदेशो वशमुपागतस्तदा न स्वदेशाचारादिसङ्करः कार्यः, किं तु यस्मिन्देशे य आचारः कुलस्थितिर्व्यवहारो वा यथैव प्रागासीत्तथैवासौ परिपालनीयो यदि शास्त्रविरुद्धो न भवति । यदा वशमुपागत इत्यनेन वशोपगमनात्प्रागनियम इति दर्शितम् । यथोक्तम् (मनुः ७।१९५)—'उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् । दूषयेच्चास्य सततं यवसान्नोदकेन्धनम्' ॥ इति ॥ ३४३ ॥

(वी० मि०) किञ्च—

मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम् ॥
कुर्याद्यथाऽस्य न विदुः कर्मणामाफलोदयात् ॥ ३४४ ॥

मन्त्रो वक्ष्यते तन्मूलं तदधीनस्थिति राज्यं यतो भवति तस्मान्मन्त्रं सुरक्षितं सुसङ्गुप्तं कुर्यात् । सुरक्षणमेव विवृणोति यथाऽस्य

---

(१) य एव नृपतेर्धर्मः—इति मुद्रितपुस्तके पाठः ।

(२) यस्मिन्देशे य आचार—इति मुद्रितपुस्तके पाठः ।

राज्ञः कर्मणां सन्धिविग्रहादीनां फलसिद्धिपर्यन्तं न विदुर्मन्त्रमन्ये मन्त्रणायामप्रविष्टाः ॥ ३४४ ॥

(मिता०) मन्त्रमूलमिति । यस्मात्तैः सार्धं चिन्तयेद्राज्यमित्याद्युक्तं मन्त्रमूलं राज्यं तस्मान्मन्त्रं यत्नेन तथा सुरक्षितं कुर्यात्, यथास्य राज्ञः कर्मणां सन्धिविग्रहादीनामाफलोदयात् फलनिष्पत्तेः प्रा(१)गन्ये मन्त्रं न जानन्ति ॥३४४॥

(वी० मि०) मन्त्रमेवाह—

अरिर्मित्रमुदासीनोऽनन्तरस्तत्परः परः ॥
क्रमशो मण्डलं चिन्त्यं सामादिभिरुपक्रमैः ॥ ३४५ ॥

अनन्तरः स्वराज्याव्यवहितदेशाधिपोऽरिः तत्परोऽरिदेशानन्तरदेशाधिपतिर्मित्रं मित्रदेशानन्तरदेशस्थितो राजा उदासीनः एते त्रयः क्रमशः पूर्वादिषु चतसृषु दिक्षु स्थिता द्वादशात्मकं मण्डलं तत्सामादिभिश्चतुर्भिरुपक्रमैरुपायैर्यथायोग्यं स्वापकाराक्षमीकर्तुं चिन्त्यं विचारेणाऽवधारणीयम् । अनेनोपायेनाऽयं वशीकर्तव्य इत्यवधारणीयमिति यावत् । इदमेव चाऽवधारणपूर्वोक्तं मन्त्रपदार्थ इति विवेक्तव्यम् । अरिप्रभृतपरपरदेशस्थाः पार्ष्णिग्राहा एष्वेवान्तर्भवन्तीत्यभिप्रेत्य ग्रन्थकृता पृथङ्नोक्ताः । बहुधा मण्डलानि च तत्र निरूपितानि विस्तरभयान्नेह तन्यन्ते ॥ ३४५ ॥

(मिता०) किञ्च—

अरिरिति । अरिः शत्रुः । मित्रं सुहृत् । उभयविलक्षण उदासीनश्च । ते च त्रयस्त्रिविधाः सहजाः कृत्रिमाः प्राकृताश्चेति । तत्र सहजोऽरिः सापत्नपितृव्यतत्पुत्रादिः । कृत्रिमोऽरिः यस्यापकृतं येन चापकृतम् । प्राकृतस्त्वनन्तरदेशाधिपतिः । सहजं मित्रं भागिनेयपैतृष्वस्रीयादि । कृत्रिमं मित्रं येनोपकृतं यस्य चोपकृतम् । प्राकृतमित्रमेकान्तरितदेशाधिपतिः । सहजकृत्रिममित्रशत्रुलक्षणरहितौ सहजकृत्रिमोदासीनौ । प्राकृतोदासीनो (२)द्व्यन्तरितदेशाधिपतिः । अरिः पुनश्चतुर्विधः—यातव्यो(३)च्छेत्तव्यपीडनीयकर्शनीयभेदेन । तत्र यातव्योऽनन्तरभूमिपतिः, व्यसनी, हीनबलो, विरक्तप्रकृतिः, विदुर्गो, मित्रहीनो, दुर्बलश्चोच्छेत्तव्यः । पीडनीयो मन्त्रबलहीनः । प्रबलमन्त्रबलयुक्तः कर्शनीयः । 'निर्मूलनात्समुच्छेदं पीडनं बलनिग्रहम् । क-

---

(१) प्राग्यावदन्ये ख ।

(२) अनन्तरदेशा क. मध्यन्तरदेशा ग. । (३) व्योच्छेदनीय क. ।

र्शनं तु पुनः प्राहुः कोशदण्डापक(१)र्शनात्' ॥ इति । मित्रं त्रिविधं बृंहणीयं कर्शनीयमिति । कोशबलहीनं बृंहणीयम् । कोशबलाधिकं कर्शनीयम् । अनन्तरस्तत्परः पर इति प्राकृतारिमित्रोदासीनानाह । अनन्तरः प्राकृतोऽरिः, तत्परः प्राकृतं मित्रं, तस्मात्परः प्राकृत उदासीनः, शेषाः पुनः प्रसिद्धत्वान्नोक्ताः । एतद्राजमण्डलं क्रमशः पूर्वादिदिक्क्रमेण चिन्त्यं तेषां चेष्टितं ज्ञातव्यम् । ज्ञात्वा च सामादिभिरुपायैर्वक्ष्यमाणैरनु(२)सन्धेयम् । एवं पुरतः पृष्ठतः पार्श्वतश्च त्रयस्त्रय आत्मा चैक इति त्रयोदशराजकमिदं राजमण्डलं पद्माकारम् । पार्ष्णिग्राहाक्रन्दासारादयस्त्वरिमित्रोदासीनेष्वेवान्तर्भवन्ति-इति । संज्ञाभेदमात्रं ग्रन्थान्तरे दर्शितमिति योगीश्वरेण न (३)पृथगुक्ताः ॥३४५॥

(वी० मि०) सामादीन् कथयन्नेव मन्त्रस्य फलमाह—

उपायाः साम दानं च भेदो दण्डस्तथैव च ॥
सम्यक् प्रयुक्ताः सिद्ध्येयुर्दण्डस्त्वगतिका गतिः ॥ ३४६ ॥

सामादय उपायाः सम्यक् मन्त्रानुसारेण प्रयुक्ता आचरिताः सिद्ध्येयुः स्वफलपर्याप्ता भवन्ति । परन्तु दण्डस्तेषां मध्येऽगतिका गत्यन्तरासत्त्वनिबन्धना गतिरुपायः । तथा चोपायान्तरसत्त्वे दण्डो न प्रयोज्य इति तात्पर्यम् । साम प्रियभाषणादिरूपं, दानं सुवर्णादेः, भेदः शत्रुसामन्तादीनामन्योन्यवैरोत्पादनं, दण्डो राज्याक्रमणवधादिरूपः । चकारादिभिश्चतुर्भिरव्ययैश्चतुर्णामुपायानां यथासम्भवं परस्परं नैरपेक्ष्येण क्वचित् क्वचिच्च परस्परसापेक्षतया फलनिष्पादकत्वमुक्तम् ॥ ३४६ ॥

(मिता०) सामादिभिरुपक्रमैरित्युक्तं, इदानीं तानुपायानाह—

उपाया इति । साम प्रियभाषणम् । दानं सुवर्णादेः । भेदो भेदकरणं, तत्सामन्तादीनां परस्परतो वैरस्यो(४)त्पादनेन । दण्ड उपांशुप्रकाशाभ्यां धनापहारादिवधपर्यन्तोऽपकारः । एते सामादयः परिपन्थ्यादिसाधनोपायाः । एते च देशकालाद्यनुसारेण सम्यक्प्रयुक्ताः सिद्ध्येयुः । तेषां च मध्ये दण्डस्त्वगतिका गतिः, उपायान्तरसम्भवे सति न प्रयोक्तव्यः । एतच्च पीडनीयकर्शनीयाभिप्रायेण । यातव्योच्छेत्तव्ययोस्तु दण्ड एव मुख्यः । एते सामादयो न केवलं राज्यव्यवहारविषयाः, अपि तु सकललोकव्यवहारविषयाः । यथा-'अधीष्व पुत्रकाधीष्व दास्यामि तव मोदकान् । यद्यन्यस्मै प्रदास्यामि कर्णमुत्पाटयामि ते' ॥ इति ॥ ३४६ ॥

(१) पकर्षणात्ख । (२) रभिसंधेयं क. । (३) न पृथगुक्तम् ख. । (४) स्योत्पादनम् ख. ।

(वी० मि०) किञ्च—

सन्धिं च विग्रहं यानमासनं संश्रयं तथा ॥
द्वैधीभावं गुणानेतान् यथावत्परिकल्पयेत् ॥३४७॥

आवाभ्यामन्योन्यस्य नापकर्तव्यमिति व्यवस्थाकरणं सन्धिः, विग्रहो युद्धं, यानमरिं प्रति प्रस्थानं, आसनमुपेक्षणं, संश्रयो बलवतो नृपान्तरस्याश्रयणं, द्वैधीभावो बलवतोर्विरुद्धयोर्द्वयोर्वचनादिना पृथक् पृथगात्मनाऽनुसरणम्। यदाहुः—

बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन्।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः॥

इति। एतान् षाड्गुण्यपदेन शास्त्रे परिभाषितान्। यथावत् यथोक्तं कालदेशशक्तिमित्रादिवशेन परिकल्पयेत् विभज्य कुर्यात्। तथेत्यनेन पूर्वश्लोकोक्तस्य सम्यक्त्वस्याऽभिधानं, चकारेण गुणानामुपायासाचिव्यं दर्शितम् ॥ ३४७ ॥

(मिता०) किंच—

सन्धिमिति। सन्धिर्व्यवस्थाकरणम्। विग्रहोऽपकारः। यानं परं प्रति यात्रा। आसनमुपेक्षा। संश्रयो बलवदाश्रयणम्। द्वैधीभावः स्वबलस्य द्विधाकरणम्। एतान्सन्धिप्रभृतीन्गुणान्यथावद्देशकालशक्तिमित्रादिवशेन कल्पयेत् ॥ ३४७ ॥

(वी० मि०) सन्ध्यादिकालान् स्फुटत्वादुपेक्ष्य यानकालमाह—

यदा सस्यगुणोपेतं परराष्ट्रं तदा व्रजेत् ॥
परश्च हीन आत्मा च हृष्टवाहनपूरुषः ॥ ३४८ ॥

सस्यैर्व्रीह्यादिभिः, गुणैर्जलेन्धनादिभिः परराष्ट्रं यदोपेतं स्यात् परश्च हीनो वाहनादिभिः स्यात्, आत्मा चोत्साहशालिवाहयोधोपेतः स्यात्तदा वशीकर्तुं व्रजेत्। प्रथमचकारेण परमित्रस्य, द्वितीयचकारेणाऽऽत्ममित्रस्य समुच्चयः ॥ ३४८ ॥

(मिता०) यानकालानाह—

यदेति। यदा परराष्ट्रं सस्यैर्व्रीह्यादिभिर्गुणैश्च समजलेन्धनतृणादिभिरुपेतं संपन्नं, शत्रुश्च हीनो बलादिभिः, आत्मा च हृष्टवाहनपूरुषः वाहनानि हस्त्यश्वादीनि तानि च पूरुषाश्च वाहनपूरुषाः हृष्टा वाहनपूरुषा यस्य स तथोक्तः। तदा परराष्ट्रमात्मसात्कर्तुं व्रजेत् ॥ ३४८ ॥

(वी० मि०) ननु मन्त्र उपायप्रयोगः षाड्गुण्यपरिकल्पनं च

व्यर्थं प्राणिनामभ्युदयविपर्ययोर्दैवाधीनत्वादित्यत आह—

दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता ॥
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥ ३४९ ॥
केचिद्दैवात्स्वभावाच्च(१) कालात्पुरुषकारतः ॥
संयोगात् (२) केचिदिच्छन्ति फलं कुशलबुद्धयः ॥३५०॥
यथा ह्येकेन चक्रेण न रथस्य ग(३)तिर्भवेत् ॥
एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥ ३५१ ॥

दैवे पुरुषकारे कर्मसिद्धिः कर्मफलप्राप्तिर्व्यवस्थिता वा भेदेन नियता। तत्र तयोर्मध्ये पौर्वदेहिकं पूर्वदेहोपार्जितमदृष्टविशेषरूपं दैवम्। अभिव्यक्तमस्मिन् देहे प्रत्यक्षीक्रियमाणं युद्धादिपुरुषव्यापाररूपं पौरुषमुच्यते । चकारः कालस्वभावयोर्वक्ष्यमाणयोः सङ्ग्रहार्थः। तयोर्लक्षणं स्पष्टत्वादुपेक्षितम्। वादिद्वैतमेव दर्शयति केचिदिति। केवलाद्दैवात्फलं केचिदिच्छन्ति दैवमात्राधीनं फलमित्यङ्गीकुर्वन्ति। केचित्स्वभावात्कारणं विनैव फलमिच्छन्तीति सर्वत्राऽन्वेति । केचित् कालात्कालमात्रात् । केचिच्च पुरुषव्यापाराद्यागपाकादेः केवलात्। केचिच्च कुशलबुद्धयो विचारनिपुणधियः कालदैवपुरुषकाराणां संयोगात्परस्परमिलनात्फलमिच्छन्ति । कार्यवस्तुस्वभावस्य फलत्वेन तद्धेतुत्वानुपपत्तिरिति द्रष्टव्यम्। तथा च मात्स्ये—

दैवं पुरुषकारश्च कालश्च पुरुषोत्तम।
त्रयमेतन्मनुष्यस्य पिण्डितस्य फलाय वै ॥

कुशलबुद्धय इत्यनेन चरमकल्पस्य सिद्धान्तत्वं दर्शितम्। अत एव दृष्टान्तेन द्रढयति यथा हीति। हिशब्दश्चार्थो दैवमित्यत्राऽन्वितः, तेन कालसमुच्चयः। न सिद्ध्यति न फलं जनयति। एतच्च प्रस्तुतोपयोगित्वादुक्तम्। वस्तुतस्तु त्रयाणामेकैकं विना परस्परं न सिद्ध्यतीति बोध्यम्॥ ३४९-३५१॥

(मिता०) प्राणिनामभ्युदयविनिपातानां दैवायत्तत्वाद्यदि दैवमस्ति तदा स्वयमेव परराष्ट्रादि वशीभविष्यति, अथ नास्ति कृतेऽपि पौरुषे न भविष्यति, अतो व्यर्थ एवायं यात्राप्रयास इत्यत आह—

दैव इति। कर्मसिद्धिः कर्मफलप्राप्तिः इष्टानिष्टलक्षणा। सा न केवलं दैवे व्यवस्थिता। अपि तु पुरुषकारेऽपि। लोके तथादर्शनात्

(१) स्वभावाद्वा—इति मुद्रितपुस्तके पाठः ।
(२) संयोगे—इति मुद्रितपुस्तके पाठः । (३) रथस्य न—इति मु० पु० पाठः ।

चिकित्सकादिशास्त्रवैयर्थ्याच्च । अपि च पुरुषकाराभावे दैवमेव नास्तीत्याह—तत्र दैवमिति। यतः पूर्वदेहार्जितं पौरुषमेव दैवमुच्यते । अल्पपुरुषकारानन्तरं महाफलोदयाभिव्यक्तं पौरुषं पौर्वदेहिकं कर्म। तस्मात्पुरुषकाराभावे न दैवमस्तीति पुरुषकारे यत्नो विधातव्यः ॥ ३४९ ॥

(मिता०) इदानीं मतान्तराण्याह—

केचिदिति । केचिदिष्टानिष्टलक्षणं फलं दैवादेवेच्छन्ति । केचित्स्वभावात्स्वयमेव भवति न कारणमपेक्षत इति । केचित्कालात् । केचित्पुरुषकारत एवेति । स्वमतमाह-दैवादीनां संयोगे समुच्चये फलं भवतीति कुशलबुद्धयो मन्वादयो मन्यन्ते ॥ ३५० ॥

(मिता०) एकैकस्मात्फलं न भवतीत्यत्र दृष्टान्तमाह—

यथेति । नात्र तिरोहितमस्ति ॥ ३५१ ॥

(वी० मि०) मित्ररूपराज्याङ्गं दर्शयन्नेव तत्सङ्ग्रहावश्यकर्तव्यत्वमाह—

हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ॥
अतो यतेत तत्प्राप्तौ (१)रक्षेत्सत्यं समाहितः ॥ ३५२ ॥

हिरण्यलाभाद् भूमिलाभाच्च मित्रलब्धिर्वरा, अतः तत्प्राप्तौ मित्रत्वविशिष्टस्य प्राप्तौ यतेत। तत्र मुख्यं व्यापारमाह समाहितः सावधानः सन् मित्रायोक्तं वचनं सत्यं रक्षेत्सत्यत्वविशिष्टं कुर्यात् । उक्ताविसंवादो न कार्य इति यावत् । भूमिलाभेभ्य इति बहुवचनमाद्यर्थकममात्यादिलाभप्राप्त्यर्थकम् ॥ ३५२ ॥

(मिता०) लाभाय परराष्ट्रं गन्तव्यमित्युक्तम् । लाभश्च त्रिविधः—हिरण्यलाभो भूमिलाभो मित्रलाभश्चेति । तेषु मित्रलाभो ज्यायान् । ततस्तत्प्राप्त्युपाये यत्नो विधातव्यः। तत्प्राप्त्युपायश्च सत्यवचनमित्याह—

हिरण्येति । हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा उत्कृष्टा तस्मात्तत्प्राप्त्यै यतेत यत्नं कुर्यात् सामादिभिः । सत्यं च रक्षेत् समाहितः सावधानः सत्यमूलत्वान्मित्रलाभस्य ॥ ३५२ ॥

(वी० मि०) उक्तान्येव सप्ताङ्गानि सङ्क्षिप्य प्रदर्शयन् राज्ञस्तत्प्राप्त्युत्तरकृत्यमाह—

स्वाम्यमात्या जनो दुर्गं कोषो(२) दण्डस्तथैव च ॥
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ॥ ३५३ ॥

---

(१) तत्प्राप्त्यै—इति मु० पु० पाठः । (२) कोशो–इति मु० पु० पाठः ।

तदवाप्य नृपो दण्डं दुर्वृत्तेषु निपातयेत् ॥
धर्मो हि दण्डरूपेण ब्रह्मणा निर्मितः पुरा ॥ ३५४ ॥

स्वामी महोत्साहत्वादिविशेषणविशिष्टो महीपतिः । तदवाप्तिश्च विशेषणावाप्तिपर्यवसिता । अमात्या मन्त्रिपुरोहितादयः । जनः प्रजावर्गः राष्ट्रशब्दवाच्यः । दुर्गं धन्वदुर्गादि । कोषः सुवर्णादिराशिः । दण्ड्यतेऽनेनेति दण्ड्यो हस्त्यश्वादिसमुदायः । मित्राणि सहज(१)प्राकृतकृत्रिमरूपाणि । एताः स्वाम्यादयः प्रकृतयो राज्यमूलकारणानि । एताभिरेव सप्तप्रकृतिभिरङ्गरूपाभिर्युक्तं राज्यं सप्ताङ्गमुच्यते । तच्च सप्ताङ्गं राज्यमवाप्य दुर्वृत्तेषु परदारपरद्रव्यापहारादिपरेषु दण्डं यथापराधं सर्वस्वापहारवधादिरूपं निपातयेत् योजयेत् । ननु प्रजानुरञ्जनपरस्य राज्ञो दण्डपातनं कथमत आह धर्मो हीति । हि यतो धर्म एव दण्डरूपेणोपलक्षितः पुरा ब्रह्मणा निर्मितः । एतच्चाधिष्ठानाधिष्ठेययोरभेदोपचारादुक्तम् । तथा च धर्मात्मकत्वात्सर्वलोकानुरञ्जनमेव दण्डपातनम् । असाधूनामनुरञ्जनं तु न राजधर्म इति भावः । एवकारेण साहित्यापन्नानामङ्गपदार्थत्वं व्यवच्छिनत्ति । तथाशब्दचशब्दाभ्यां परस्परसाहित्येन मूलनिर्वाहकत्वमभिप्रैति ॥ ३५३-३५४ ॥

(मिता०) इदानीं राज्याङ्गान्याह—

स्वाम्यमात्या इति । महोत्साह इत्याद्युक्तलक्षणो महीपतिः स्वामी । अमात्या मन्त्रिपुरोहितादयः । जनो ब्राह्मणादिप्रजाः । दुर्गं धन्व(२) दुर्गादि । कोशः सुवर्णादिधनराशिः । दण्डो हस्त्यश्वरथपत्तिलक्षणं चतुरङ्गबलम् । मित्राणि सहजकृत्रिमप्राकृतानि । एताः स्वाम्याद्याः राज्यस्य प्रकृतयो मूलकारणानि । एवं राज्यं सप्ताङ्गमुच्यते ॥ ३५३ ॥

(मिता०) तदवाप्येति । तदेवंविधं राज्यं प्राप्य दुर्वृत्तेषु वञ्चकशठधूर्तपरदारपरद्रव्यापहारिहिंसकादिषु नृपो दण्डं पातयेत्प्रयोजयेत् । हि यस्माद्धर्म एव दण्डरूपेण पूर्वं ब्रह्मणा निर्मितः । तस्य च दण्ड इति यौगिकी संज्ञा—'दण्डो दमनादित्याहुस्तेनादान्तान्दमयेत्' इत्यादिगौतमस्मरणात ॥ ३५४ ॥

---

(१) सहज—इति क. पुस्तके नास्ति ।

(२) विवृतमेतत्सविस्तरं ३२१ तमपद्यटिप्पण्याम् ।

(वी० मि०) स च दण्डो यथाशास्त्रं कार्योऽन्यथा राज्ञो दोषमाह—

स नेतुं न्यायतः शक्योऽलुब्धेन कृतबुद्धिना(१) ॥
सत्यसन्धेन शुचिना सुसहायेन धीमता ॥ ३५५ ॥
यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमानुषम् ॥
जगदानन्दयेत्सर्वमन्यथा(२) तत्प्रकोपयेत् ॥ ३५६ ॥
अधर्मदण्डनं स्वर्गकीर्तिलोकविनाशनम् ॥
सम्यक्तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम् ॥३५७॥

स धर्मस्वरूपो दण्डोऽलुब्धेन लोभशून्येन, कृतबुद्धिना स्थिरबुद्धिना, सत्यसन्धेन यथार्थप्रतिज्ञेन, शुचिना जितारिषड्वर्गेण, सुसहायेन समीचीनामात्यादिमता, धीमता नीतिविज्ञेन, राज्ञा न्यायतः शास्त्रानुसारेण नेतुं दण्ड्येषु प्रापयितुं शक्यः। तथा लोभत्यागादिपुरःसरं न्यायतः ससहायो दण्डयेदिति तात्पर्यम्। मिताक्षरायां तु 'स नेतुं न्यायतोऽशक्योलुब्धेनाऽकृतबुद्धिने'ति पठित्वा पृथगेवायं वाक्यार्थः। सत्यसन्धेनेत्यादि तु वाक्यान्तरमित्यभिप्रेत्य व्याख्यातम्। तथाप्रयुज्यमानस्याऽतथाप्रयुज्यमानस्य च दण्डस्य फलमिष्टमनिष्टं च क्रमेणाह यथाशास्त्रमित्यादि। यथाशास्त्रं शास्त्रानतिक्रमेण प्रयुक्तः स दण्डः देवासुरसहितं मानुषसहितं जगत्सर्वमशेषं विश्वजातमानन्दयेत् हर्षयति। अन्यथा शास्त्रातिक्रमेण प्रयुक्तः स दण्ड उक्तलक्षणं जगत्प्रकोपयेत् क्रोधयुक्तं करोति। एवं च जनानुरागप्रभवाः सम्पद इत्यादिकथितसम्पत्तिदानत्वतद्विपर्ययरूपफलद्वयमुक्त्वा दण्डस्य फलान्तरमप्याह अधर्मेति। स्वर्गो यन्न दुःखेनेत्यादिलक्षितः सुखविशेषः। कीर्तिः सम्यक्त्वख्यातिः। लोकः प्रजारूपः। तद्विनाशनं तद्विरोधिराज्ञोऽधर्मेण दण्डनं भवति प्रजाविनाशनं युद्धपराजयेन तदप्रभुत्वापादनं पर्यवसन्नं तुशब्देन ॥ ३५५–३५७ ॥

(मिता०) स इति। स पूर्वोक्तो दण्डो लुब्धेन कृपणेनाऽकृतबुद्धिना चञ्चलबुद्धिना न्ययतो न्यायानुसारेण नेतुं प्रयोक्तुं शक्यो न भवति। कीदृशेन तर्हि शक्य इत्याह—सत्यसन्धेनाप्रतारकेण। शुचिना जितारिषड्वर्गेण। सुसहायेन पूर्वोक्तसहायसहितेन। धीमता नयानयकुशलेन स दण्डो न्यायतो धर्मानुसारेण नेतुं शक्यः ॥३५५॥

(१) स नेतुं न्यायतोऽशक्यो लुब्धेनाऽकृतबुद्धिना–इति मु० पु० पाठः।
(२) तु प्रको०–इति क० पु० पाठः।

(मिता०) यथाशास्त्रमिति । स दण्डः शास्त्रोक्तमार्गेण प्रयुज्यमानः सन् देवासुरमानवैः सहितं इदं सर्वं जगदानन्दयेत् हर्षयेत् । अन्यथा शास्त्रातिक्रमेण प्रयुक्तश्चेज्जगत्प्रकोपयेत् ॥ ३५६ ॥

(मिता०) न केवलमधर्मदण्डन जगत्प्रकोपः(१), अपि तु प्रयोक्तुर्दृष्टादृष्टहानिरपीत्याह—

अधर्मदण्डनमिति । यः पुनः शास्त्रातिक्रमेण लोभादिना दण्डः कृतः स पापहेतुत्वात्स्वर्गं कीर्तिं लोकांश्च विनाशयति । शास्त्रोक्तमार्गेण तु कृ(२)तो धर्महेतुत्वात्स्वर्गकीर्तिजयानां हेतुर्भवति ॥३५७॥

(वी० मि०) दण्डौदास्यं व्यवच्छिनत्ति । तदेव स्पष्टयति—

अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा ॥
नाऽदण्ड्यो नाम राज्ञोऽस्ति धर्माद्विचलितः स्वकात् ॥ ३५८ ॥

भ्रात्रादयः प्रसिद्धाः । अर्घ्योऽर्घार्ह आचार्यादिः । अपि चेत्यनेन पितृमात्रादिसमुच्चयः । भ्रात्रादिरपि स्वीयात् धर्माद्विचलितस्तद्विरुद्धकारी राज्ञो नाम सम्भावनायामदण्ड्यो नास्तीत्यर्थः । अपि भ्रातेत्यपिकारेण किमुतोदासीनः शत्रुर्वेति सूचितम् ॥ ३५८ ॥

(मिता०) अपीति । अर्घ्योऽर्घार्ह आचार्यादिः । शेषः प्रसिद्धः । एते भ्रातृसुतादयोऽपि स्वधर्माच्चलिता दण्ड्याः किमुतान्ये । यतः स्वधर्माच्चलितः अदण्ड्यो नाम राज्ञः कोऽपि नास्ति । एतश्च मातापित्रादिव्यतिरेकेण । तथा च स्मृत्यन्तरे—'अदण्ड्यौ मातापितरौ स्नातक(३)पुरोहितपरिव्राजकवानप्रस्थाः श्रुतशीलशौचाचारवन्तस्ते हि धर्माधिकारिणः' इति ॥ ३५८ ॥

(वी० मि०) दण्डादिफलेन स्वर्गेणैव सफलं दण्डप्रयोजकं व्यवहारदर्शनमिति व्यवहारो राज्ञा द्रष्टव्य इत्याह—

यो दण्ड्यान् दण्डयेद्राजा सम्यग्वध्यांश्च घातयेत् ॥
इष्टं स्यात्क्रतुभिस्तेन सहस्रशतदक्षिणैः(४) ॥ ३५९ ॥
इति सञ्चिन्त्य नृपतिः क्रतुतुल्यफलं पृथक् ॥
व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोऽन्वहम् ॥ ३६० ॥

यो राजा दण्ड्यान् वधव्यतिरिक्तदण्डार्हान् सम्यक् शास्त्रानुसारेण दण्डयेत् अर्थाद्वधातिरिक्तेन वध्यान् वधार्हान् सम्यक् शा-

(१) प्रकोपममपितु क० । (२) कृतः सोऽपापहेतुत्वात् क० ग० ।
(३) परिव्राजकपुरोहित ख० । (४) समाप्तवरदक्षिणैः—इति मुद्रितपुस्तके पाठः ।

स्त्रोक्तप्रकारेण वीरणवेष्टनपूर्वकदाहादिना घातयेत् । चकारेणाऽकार्यिणां सन्देहादिमतां सन्देहाद्यपाकरणं समुच्चीयते । तेन राज्ञा सहस्रशतसुवर्णरूपभूरिदक्षिणैः क्रतुभिरिष्टं स्यात् । तादृशक्रतुजन्यफलभाजा भवितव्यमिति यावत् । समाप्तवरदक्षिणैरिति क्वचित् पाठः । तत्र समाप्ता पर्याप्ता (१) वरा भूयसी दक्षिणा येषां तैरित्यर्थः । इति क्रतुतुल्यफलं सञ्चिन्त्याऽवधार्य सभ्यैः परिवृतः सहितः स्वयं व्यवहारान् भाषोत्तररूपान् पृथक् पृथक्प्रत्यहं पश्येत् निर्णयार्थं विचारयेत् । स्वयमिति सति सम्भवे । अन्यथा तु 'अपश्यता कार्यवशा'दित्यग्रिमाध्याये वक्ष्यते । इमामेव व्यवस्थामभिप्रेत्य(२) बृहस्पतिरपि—

राजा कार्याणि सम्पश्येत् प्राड्विवेकोऽथवा द्विजः ।
न्यायाङ्गान्यग्रहं कृत्वा सभ्यशास्त्रमते स्थितः ॥

इति । मनुः—

यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम् ।
तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः ॥

व्यासः—

द्विजान् विहाय यः पश्येत् कार्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोपश्च नश्यति ॥

एतेन शूद्रसहायताऽपि निरस्ता ॥ ३५९-३६० ॥

(मिता०) किञ्च—

य इति । यस्तु दण्ड्यान्स्वधर्मचलनादिना दण्डयोग्यान्सम्यक् शास्त्रदृष्टेन मार्गेण धिग्धनदण्डादिना दण्डयति, वध्यान्वधार्हान्घातयति तेन राज्ञा भूरिदक्षिणैः क्रतुभिरिष्टं भवति । बहुदक्षिणक्रतुफलं प्राप्नोतीत्यर्थः । न च फलश्रवणाद्दण्डप्रणयनं काम्यमिति मन्तव्यम् । अकरणे प्रायश्चित्तस्मरणात् । यथाह वसिष्ठः—'दण्डोत्सर्गे राजैकरात्रमुपवसेत्त्रिरात्रं पुरोहितः कृच्छ्रमदण्ड्यदण्डने पुरोहितस्त्रिरात्रं राजा' इति ॥ ३५९ ॥

(मिता०) दुष्टे सम्यग्दण्डः प्रयोक्तव्य इत्युक्तं, दुष्टपरिज्ञानं च व्यवहारदर्शनमन्तरेण न भवतीति तत्परिज्ञानाय व्यवहारदर्शनमहरहः स्वयं कर्तव्यमित्याह—

इतीति । इत्येवमुक्तप्रकारेण क्रतुतुल्यं फलं दण्ड्यदण्डेन, स्व-

(१) पर्याप्ता-इति क० पुस्तके नास्ति ।

(२) अभिप्रेत्य-इत्यारभ्य स्थितः-इत्यन्तं नास्ति ख० पुस्तके ।

र्गादिनाशं चादण्ड्यदण्डेन सम्यग्विचिन्त्य पृथक्पृथग्वर्णादिक्रमेण सभ्यैर्वक्ष्यमाणलक्षणैः परिवृतः प्रतिदिनं व्यवहारान्वक्ष्य(१)माणमार्गेण दुष्टादुष्टपरिज्ञानार्थं राजा स्वयं पश्येत् ॥ ३६० ॥

(वी० मि०) कुलादीनां दण्डनानन्तरमपि तद्विषयकं राजकृत्यान्तरमाह—

कुलानि जातीः श्रेणीश्च गणान् जनपदानपि ॥
स्वधर्माच्चलितान् राजा विनीय स्थापयेत्पथि ॥ ३६१ ॥

कुलं ब्राह्मणादिसमूहः जातिर्मूर्द्धाभिषिक्तादिवर्णसङ्करः । श्रेणिर्वणिगादिसमूहः । गणो नरादिसमुदायः । जनपदः कर्षककारुप्रभृतिः । चकारो गोरक्षकादिसमुच्चयार्थः । अपिकारः स्वराज्यवर्तिनामनुक्तानां समुच्चयार्थः । एतान् स्वधर्माच्चलितान् स्वधर्मविरुद्धकारिणो विनीय यथार्हं दण्डयित्वा पथि धर्म्ये मार्गे राजा स्थापयेत् स्थिरीकुर्यात् स्वधर्मं कारयेदिति यावत् ॥ ३६१ ॥

(मिता०) कुलानीति । कुलानि ब्राह्मणादीनाम् । जातयो मूर्धावसिक्तप्रभृतयः । श्रेणयस्ताम्बूलिकादीनाम् । गणा हेला(२)वुक्कादीनाम् । जानपदाः कारुकादयः । एतान्स्वधर्माच्चलितान्प्रच्युतान् राजा यथापराधं विनीय दण्डयित्वा पथि स्वधर्मे स्थापयेत् । दण्डं दुर्वृत्तेषु निपातयेदित्युक्तं, स च दण्डो द्विविधः शारीरोऽर्थदण्डश्चेति । यथाह नारदः—'शारीरश्चार्थदण्डश्च दण्डो हि द्विविधः स्मृतः । शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्तितः ॥ काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च' ॥ इति । द्विविधोऽप्यपराधानुसारेणानेकधा भवति । आह स्म—'शारीरो दशधा प्रोक्तो ह्यर्थदण्डस्त्वनेकधा' इति ॥ ३६१ ॥

(वी० मि०) चतुर्विधो दण्डो वक्ष्यते, तत्र दण्डस्य धनपरिमाणविशेषज्ञानाधीनत्वात्तत्परिभाषते—

जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम् ॥
तेऽष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते ॥ ३६२ ॥
गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः ॥
कृष्णालः पञ्च ते माषस्ते सुवर्णस्तु षोडश ॥ ३६३ ॥

---

(१) वक्ष्यमाणधर्मेण क. । (२) हेलाबुक्का अश्वव्यवहाराणिः ।

व्यावहारिकैः पञ्चभिर्निष्कैरेकः सुवर्णो भवति। ते चत्वारः पलमिति। निष्काणां विंशतिः पलम्। यदा तु सूक्ष्मैस्त्रिभिर्यवैः कृष्णलः परिकल्प्यते तदा व्यावहारिकनिष्कस्य द्वात्रिंशत्तमो भागः कृष्णलो भवति। तस्मिन्पक्षे सुवर्णः सार्धं निष्कद्वयं भवति। पलं च दशनिष्कम्। यदा तु मध्यमयवैः कृष्णलपरिकल्पना तदा निष्कस्य विंशतितमो भागः कृष्णलः, सुवर्णश्चतुर्निष्कः, षोडशनिष्कं पलम्। एवं पञ्चसुवर्णं पलमिति। पक्षे विंशतिनिष्कं पलम्। एवमन्यदपि निष्कस्य चत्वारिंशो भागः कृष्णलः, द्विनिष्कः सुवर्णोऽष्टनिष्कं पलमित्यादिलोकव्यवहारानुसारेणास्मादेव सूत्रादूहनीयम् ॥ ३६२-३६३ ॥

(मिता०) एवं सुवर्णस्योन्मानं प्रतिपाद्येदानीं रजतस्याह—

द्वे कृष्णल इति। द्वे कृष्णले पूर्वोक्ते रूप्यमाषो रूप्यसम्बन्धी माषः। ते रूप्यमाषाः षोडश धरणम्। पुराण इत्यस्यैव संज्ञान्तरम्। 'ते षोडश स्याद्धरणं पुराणश्चैव राजतः' इति (८।१३८) मनुस्मरणात्। दशभिर्धरणैः शतमानं पलमिति चाभिधीयते। पूर्वोक्ताश्चत्वारः सुवर्णा एको राजतो निष्को भवति ॥ ३६४ ॥

(मिता०) इदानीं ताम्रस्योन्मानमाह—

कार्षिक इति। पलस्य चतुर्थोऽशः कर्ष इति लोकप्रसिद्धः। कर्षेणोन्मितः कार्षिकः। ताम्रस्य विकारस्ताम्रिकः। कर्षसंमितस्ताम्रविकारः पणसंज्ञो भवति कार्षापणसंज्ञकश्च। 'कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः' इति (८।१३६) मनुवचनात्। पञ्चसुवर्णपलपक्षे विंशतिमाषः पणो भवति। तथा सति 'माषो विंशतिमो भागः पणस्य परिकीर्तितः' इत्यादिव्यवहारः सिद्धो भवति। चतुःसुवर्णपलपक्षे तु षोडशमाषः पणो भवति। अस्मिंश्च पक्षे सुवर्णकार्षापणशब्दानां समानार्थत्वेऽपि पणकार्षापणशब्दौ ताम्रविषयावेव। एवं तावद्धेमरूप्यताम्राणामुन्मानमुक्तं, दण्डव्यवहारोपयोगित्वात्। कांस्यरीतिकादीनामपि लोकव्यवहाराङ्गभूतानामेवमेवोन्मानं द्रष्टव्यम् ॥३६५॥

(मिता०) स्वशास्त्रपरिभाषामाह—

साशीतिरिति। पणानां सहस्रं पणसहस्रं तत्परिमाणमस्येति पणसाहस्रः। अशीत्या सह वर्तत इति साशीतिः। अशीत्यधिकपणसहस्रपरिमितो यो दण्डः स उत्तमसाहससंज्ञो वेदितव्यः। तदर्धं मध्यमः तस्य साशीतिपणसहस्रस्यार्धं चत्वारिंशदधिकपणपञ्चशतपरिमितो दण्डो मध्यमसाहससंज्ञः। तदर्धमधमः तस्य चत्वारिंश-

दधिकपञ्चशतपणस्यार्धं सप्तत्यधिकपणशतद्वयपरिमितो दण्डोऽधमसाहससंज्ञः स्मृत उक्तो मन्वादिभिः । यत्तु 'पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः । मध्यमः पञ्चविज्ञेयः सहस्रं त्वेव चोत्तमः' इति (८।३८) मनुनोक्तं, तत्पक्षान्तरममतिपूर्वापराधविषयं द्रष्टव्यम् ॥३६६॥

(वी० मि०) अथ दण्डान् विभजन्नेव तत्प्रयोगविकल्पानाह—

धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा ॥
योज्या व्यस्तास्समस्ता वा ह्यपराधवशादिमे ॥ ३६७ ॥
ज्ञात्वाऽपराधं देशं च कालं बलमथापि वा ॥
वयः कर्म च वित्तं च दण्डं दण्ड्येषु पातयेत् ॥ ३६८ ॥

धिग्दण्डो धिक् त्वामिति भर्त्सनम् । वाग्दण्डः त्वं पापिष्ठोऽसि त्वां ताडयिष्यामीत्यादिर्यथेष्टपरुषभाषणरूपः । धनदण्डो धनदानरूपः । वधोऽङ्गादिच्छेदरूपः, मारणरूपश्च । तथाशब्देन बन्धनताडनसमुच्चयः । इमे दण्डाः समस्ताः समुदिता व्यस्ता एको द्वौ त्रयो वाऽपराधानुसारेण दण्ड्येषु योज्याः । हिशब्दोऽवधारणे, तेनाऽपराधानुसारिदण्डव्यवच्छेदः । न केवलमपराधानुसारादेव दण्डः, किं त्वपराधवद्देशादिरप्यनुसर्तव्य इत्याह ज्ञात्वेति । अपराधं सकृदसकृत्कृतं लघुगुरुरूपं च, देशमुपद्रुतानुपद्रुतं, कालं सुभिक्षदुर्भिक्षादियुक्तं, बलं शरीरसामर्थ्यमुत्कृष्टं च, वयो बाल्यादि, कर्म अग्निहोत्रादि सूनाधिष्ठानादि च दण्ड्यस्य ज्ञात्वा सम्यग्विचार्य दण्ड्येषु अपराधकारिषु दण्डं पातयेत् योजयेदिति ॥ ३६७–३६८ ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिनीराजितचरणकमल-
श्रीमन्महाराजाधिराजमधुकरसाहिसूनुश्रीमन्महाराजचतुरुदधि-
वसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योजि-
तश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूरिसूनुसकलवि-
द्यापारावारपारीणधुरीणश्रीमन्मित्रमिश्रकृते
श्रीवीरमित्रोदयाख्याने श्रीयाज्ञवल्क्य-
व्याख्याने राजधर्मप्रकरणं
नाम प्रथमोऽध्यायः ॥

(मिता०) दण्डभेदानाह—

धिग्दण्ड इति। धिग्दण्डो धिग्धिगिति कुत्सनम्। वाग्दण्डस्तु परुषशापवचनात्मकः। धनदण्डो धनापहारात्मकः। वधदण्डः शारीरोऽवरोधादिर्जीवितान्तः। एते चतुर्विधा दण्डाः व्यस्ता एकैकशः, समस्ताः द्वित्राः त्रिचतुरा वाऽपराधानुसारेण प्रयोक्तव्याः। उक्तक्रमेण पूर्वपूर्वासाध्ये उत्तर उत्तरः प्रयोक्तव्यः। यथाह मनुः—'धिग्दण्डं प्रथमं कुर्याद्वाग्दण्डं तदनन्तरम्। तृतीयं धनदण्डं तु वधदण्डमतः परम्' ॥ इति ॥ ३६७ ॥

(मिता०) दण्डव्यवस्थानिमित्तान्याह—

ज्ञात्वेति। यथापराधं ज्ञात्वा दण्डप्रणयनमेवं देशकालवयःकर्मवित्तानि ज्ञात्वा तदनुसारेण दण्ड्येषु दण्डार्हेषु दण्डप्रणयनं कुर्यात्। तथा बुद्धिपूर्वाबुद्धिपूर्वसकृदावृत्त्यनुसारेण च। यद्यपि राजानमधिकृत्यायं राजधर्मकलाप उक्तस्तथापि वर्णान्तरस्यापि विषयमण्डलादिपरिपालनाधिकृतस्यायं धर्मो वेदितव्यः। 'राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः' इत्यत्र पृथङ्नृपग्रहणात्करग्रहणस्य रक्षार्थत्वाच्च रक्षणस्य दण्डप्रणयनायत्तत्वादिति ॥ ३६८ ॥

इति श्रीपद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ सदाचारः प्रथमाध्यायः ॥

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः ॥

अस्मिन्नध्याये प्रकरणानि—१ उपोद्घातप्रकरणम्। २ ब्रह्मचारिप्रकरणम्। ३ विवाहप्रकरणम्। ४ जातिविवेकप्रकरणम्। ५ गृहस्थधर्मप्रकरणम्। ६ स्नातकप्रकरणम्। ७ भक्ष्याभक्ष्यप्रकरणम्। ८ द्रव्यशुद्धिप्रकरणम्। ९ दानधर्मप्रकरणम्। १० श्राद्धप्रकरणम्। ११ गणपतिकल्पप्रकरणम्। १२ ग्रहशान्तिप्रकरणम्। १३ राजधर्मप्रकरणम्। एवं त्रयोदश प्रकरणानि ॥

याज्ञवल्क्यमुनिशास्त्रगतेयं विवृतिर्न कस्य विहिता विदुषः।
प्रमिताक्षरापि विपुलार्थवती परिषिञ्चति श्रवणयोरमृतम् ॥ १ ॥

प्रथमोऽध्यायः समाप्तः ॥

हरिदाससंस्कृतग्रन्थमालासमाख्य–

काशीसंस्कृतसीरीज़–पुस्तकमाला।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति। एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति। अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते। परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत्।

तत्र मुद्रितग्रन्थनामानि।	मूल्यम्।
१ नलपाकः नलविरचितः। संपूर्णः (पाकशास्त्रम् १)	रु० १—८
२ संक्षेपशारीरकम्। रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम्। (वेदान्तं १)	रु० ८—०
३ वैशेषिकदर्शनम्। पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम्. (वैशेषिकं १)	रु० २—८
४ श्रीसूक्तम्। विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम्। (वैदिकं १)	रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः। (व्याकरणं १)	रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रीकृतव्याख्यासहिता। (न्यायं १)	रु० ६—०
७ पञ्चीकरणम्। वार्तिकाभरणालङ्कृतवार्तिकटीकया–तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम्। (वेदान्तं २)	रु० ०—८
८ अलङ्कारप्रदीपः। पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः। (काव्यं १)	रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः। (कामशास्त्रं १)	रु० ०—१२
१० जातकपारिजातः। श्रीवैद्यनाथशर्मणा विरचितः। (ज्यो० १)	रु० २—०
११ पारस्करगृह्यसूत्रम्। कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम्। (कर्म० १)	रु० ०—८

College Section.

१२ पुरुषसूक्तम्। सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम्। (वैदिकं २) रु० १—४

१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम्। (वेदान्तं ३) रु० १—४

१४ कुमारसंभवं महाकाव्यम्। महाकवि-श्रीकालिदासवि०। सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम्। (काव्यं २) रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः। आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः। (छंदः १) रु० ०—६

१६ कारिकावली। मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा। (न्यायं २) रु० १—०

१७ पारस्करगृह्यसूत्रम्। काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम्। हरिहरभाष्यसहितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृत-टिप्पण्यादिभिः सहितं च। (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं) रु० ०—८

२० कातीयेष्टिदीपकः। (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः। (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम्। हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम्। (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्यटीका-श्रीवाचस्पतिमिश्रविरचिता। सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—६

२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः। अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। व्याक० रु० ४—८

२८ रघुवंशमहाकाव्यम्। महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम्। म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम्। (काव्यवि० ३) रु० ०—१२

२९ कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं वहुयत्नैरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम्। वहुखण्डितपाठान् परिपूर्य, सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्। काम० रु० ८—०

३० न्यायकुसुमाञ्जलिः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः। न्यायं रु० ६—०

३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या—तत्त्वप्रकाशिकया टीकया च सहितः। व्याकरणं रु० ३—०

३२ अर्थसंग्रहः। पूर्वमीमांसासारसंग्रहरूपः। श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः। मीमां० रु० १—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम्। परमर्षिभारद्वाजोद्द्योतकरविरचितम्। महर्षि—गोतमादिचरितसम्वलितबृहत्भूमिकासहितम्। न्यायं रु० ६—०

३४ शुक्लयजुर्वेदसंहिता। वाजसनेयिमाध्यन्दिनशाखीया। श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता। (भाग १-२-३-४) वैदिकं रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता। श्रीसायणाचार्यविरचितभाष्यसहिता। १ अध्यायादारभ्य २० अध्यायपर्यन्ता। वैदिकं रु० ६—०

३६ सिद्धान्तलेशसंग्रहः। श्रीमदप्पयदीक्षितविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः। वेदान्तं रु० ६—०

३७ काशिका। श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता। व्याकरणं रु० ६—०

काशीसंस्कृतसीरीज़ ।

३८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः । टिप्पण्या च संयोजितः । व्याकरणं रु० १

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवादसमेतः । वेदान्तं रु० २

४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः । ज्योतिषं रु० ०

४१ मेदिनीकोशः–मेदिनीकारविरचितः । कोशं रु० १

४२ मीमांसादर्शनम् । श्रीशवरस्वामिविरचितभाष्यसहितम् (भाग१—२) मीमांसा रु० १०—

४३ न्यायदर्शनम् । श्रीगोतममुनिप्रणीतम् । श्रीवात्स्यायनमुनिप्रणीतभाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् । न्यायं रु० ३—

४४ दानमयूखः । विद्वद्वरश्रीनीलकण्ठभट्टविरचितः । धर्मशास्त्रं रु० १—

४५ कालमाधवः । विद्वद्वरश्रीमाधवाचार्यविरचितः । धर्मशास्त्रं रु० १—

४६ भास्वती । श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रवोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता । ज्योतिषं रु० २—

४७ फक्किकाप्रकाशः । उपाध्यायोपाह्ववैयाकरणकेसरीविरुदाङ्कितमैथिलेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण्या विभूषितः । व्याकरणं रु० १

४८ मिताक्षरा । श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या-श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामिकृता । शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च । वेदा० रु० १

पत्रादिप्रेषणस्थानम्

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर के उत्तर फा
बनारस सिटी ।